क. शिवचतुर्दशी व्रतोद्यापनम् १ २

ख. द्वादशी व्रतोद्यापनम् २ ५

ग. अनंत व्रतोद्यापनम् ३ ३

घ. जन्माष्टमी व्रतोद्यापनम् ४ 10

ङ. पंचमी व्रतोद्यापनम् ५ 4 ५

४७७५ —— ४७८३

4779-1783 / 3०

कृ.च
उ.
१

ॐ नमः शिवाय अथ कृष्णचतुर्दश्युद्यापनं ॥ नंदिकेश्वर उवाच शृणुष्वावहितो ब्रह्मन्व्रतमेतन्महेश्वरं व्रतं
त्रिषु लोकेषु विख्यातं नाम्ना शिवचतुर्दशी कार्त्तिके देवदेवेशं त्वामहं शरणं गतः त्रयोदश्यां निराहारा
स्त्वामद्य चार्चये शंकरं सौवर्णं वृषभं दत्वा भोक्ष्यामि चापरेऽहनि एवं नियमकृत्सुप्त्वा प्रातरुत्थाय मानवः कृ
तस्नानो जपेत्पश्चादुमया सह शंकरं पूजयेत्कमलैः शुक्लैर्गंधमाल्यानुलेपनैः पादौ नमः शिवायेति शिर
स्सर्वात्मने नमः ललाटं सर्वनेत्राय नेत्राणि हरये नमः मुखमिंदुमुखायेति श्रीकंठाय च कंधरं सद्योजाताय क
र्णौ तु वामदेवाय वै भुजे अघोरहृदयायेति हृदयं चाभिपूजयेत् पादौ तत्पुरुषायेति ईशानायेति पूजनं अनंतै
श्वर्यनाथाय नमो तेनार्चयेद्बुधः प्रधानाय नमो जंघे गुल्फौ व्योमात्मने नमः पार्वतीपतिरूपाय पृष्ठमध्येर्चयेन्नरः
नमस्तुष्टोस नमः उष्टौ नमो देवं प्रपूजयेत् ततस्तु वृषभं हैमं रुद्रकुंभसमन्वितं शुक्लमाल्यांबरधरं पंचरत्नसमन्वि
तं भक्ष्यैर्नानाविधैर्युक्तं ब्राह्मणाय निवेदयेत् प्रीयतां देवदेवोत्र सद्योजातः पिनाकधृक् ततस्तु विमानेनैव तर्प
येद्भक्तितस्ततः पृषदान्नं च संपाद्य स्वपेद्भूमावुदङ्मुखः पंचदश्यां ततः पूज्य विप्रान्भोजीत वाग्यतः तद्वत्कृ
ष्णचतुर्दश्यामेवमेतत्समाचरेत् येन मासेषु नामानि तानि बोध क्रमादिह मार्गशीर्षादिमासेषु स्वप्तुश्चैतदुदी
रयेत् शंकराय नमस्तुभ्यं नमस्ते करवीरक त्र्यंबकाय नमस्तेस्तु महेश्वराय ततः परं नमः परमशान्ताय नम १

त्रिपुरांतकेनमः नमस्तेपरमानंदनमःसोमार्धधारिणे नमशिवायेनितयात्वामहंशरणंगतः गोमूत्रा
दिततोगव्यंपीत्वातपशुद्धिमाप्नुयात् मंदारमल्लिकाद्यैश्चततोभ्यर्च्यावरोत्पलैः पुनश्चकार्तिकेमासिसं
प्राप्तेनपथिहिज्ञात् श्रनैर्नानाविधैभक्ष्यैर्वस्त्रमाल्याविभूषणैः हलानीलवृषोत्सर्गहेमंचोमामहेश्वरं सु
लाफलाष्टकसुतंसितनेत्रपटांकितं सर्वोपकरणोपेतायांघाप्यसुदकज्ञंभयोः नाम्नपात्रोपरिततःशालिनंदु
लसंयुतं स्थाप्यविप्रायशांतायवेदव्रतधरायच ज्येष्ठसामविदेदेयंनभकव्रतिनेक्वचित् श्रव्यंगांगायसो
म्यायसदाकल्याणकारिणे सपत्नीकायसंपूज्यछत्रमाल्याभिभूषणैः वित्तशाठ्यंनकुर्वीतकुर्वन्मोहात्पत
त्यधः श्रनेनविधिनायस्तुकुर्याच्छिवचतुर्दशी सोश्वमेधसहस्रस्यफलंप्राप्नोतिमानवः ब्रह्महत्यादिकंकिं
चिदन्यत्रसुमहाकृतं पितृभिर्मातृभिर्वापितत्सर्वंनाशमाप्नुयात् दीर्घायुरारोग्यकुलाभिवृद्धीरत्नात्तयाश्
नचतुर्भुजंते गणाधिपत्यंद्विविकल्पकोटिप्रांतंवसित्वापदमेतियांभोः नवृहस्पतिरप्यंतमस्याःफलमिहापि
मितेववक्तुं नचसिद्धगणोप्यलंवचाहंयदिजिह्वायुतकोटयोपिवक्ते भवतामस्वल्लभपठतिस्मवेहासदा
कृणोत्यपिविमत्सरस्सकलपापविनाशनी इमांशिवचतुर्दशीममरकामिनीकोटयस्स्तुवंतितमनिंदि
तंकिमुममाचरेद्यःसदा यावाथनारीकुरुतेतिभक्त्याभर्तारमापृछ्यसुदेहतांश्च सापिप्रसादात्परमेश्वर

शै॰च॰
उ॰
२

स्पपरंपदंयातिपिनाकपाणे इतिमत्स्यपुराणे कैलासपीठमध्यस्थं भगवंतमुमापतिं प्रणम्य कार्त्तिकेयो
ऽथपप्रच्छविनयान्वितः कुमारः भगवन्पारमेशानव्रतयास्याय:पुराविभो अस्त्रीव्रतविधिःपुण्यशिवाराध
नसंज्ञया तथाकृत्स्नचतुर्दश्यांततःप्रश्नोसशंकरः समाख्याहिवमीशानभक्तानामीहितेश्वरः श्रीमहेश्व
रः साधुसाधुसमासेनभक्तानांहितकाम्यया शृणुव्रतविधानंतन्नाममंत्रसमन्वितं प्रसादपरमोमंत्रोव्यो
मव्यापथतारकः बहुरूपोमृत्युजिह्वाभर्ग्यावाथषडक्षरः दीक्षाकालेथवाशिष्योगुरुणायोत्रमंत्रराट् यत्राद्भि
कर्मकरणेजपध्यानविधिक्रिया एषांस्मरणादेवसन्निधिंकुरुतेशिवः महापातकिनामेतेश्लोकाःपापहरा
अपि श्रद्धाभक्तिसमालभ्याशृज्यपएवविभुपिशावः चतुर्दशीकृत्स्नास्तुमनोरथफलैप्सुभिः फाल्गुणादिषुमा
सेषुनामभिस्ताःशृणुष्वतत् शिवःफाल्गुणमासस्तुक्तश्चैत्ररुद्रोवृषाकपिः वैशाखेवहरोज्येष्ठेत्र्याषाढेत्र्यंबकः
स्मृतः श्रीकंठःश्रावणेमासिभवोभद्रपदेविभुः ईशानश्चाश्वयुङ्मासिशार्वःकार्तिकसंज्ञके महादेवोमा
र्गशीर्षेपौषेपशुपतिःप्रभुः माघेमाहेश्वरइतिनामभिःपूज्यईश्वरः सुमुह्याभिर्महादेवोमार्गशीर्षादितोह
रः आरभ्योनामभिर्येस्तुशृणुतत्तुत्रभक्तितः हंसःशुचिर्ज्योतिरूपकपर्दीब्रह्मचोन्मनः महाहंसोविसर्गश्च
महाशुक्लएवच प्राणश्चैवेश्वरश्चैवशिवोंतेद्वादशाःस्मृतः तत्रफाल्गुणमासस्यशुद्धात्मानियतेंद्रियः २

संकल्प्य कृष्णद्वादश्यां अर्चयेत्परमेश्वरं । लिंगस्नानं च विविधैस्तोयतीर्थैर्हरं यजेत् सुगंधिभिर्दधिक्षीरैर्घृतेन म
धुना तथा पंचगव्येन शुद्धेन धूपदीपैः सुगंधिभिः भक्ष्यैर्भोज्यैर्यथाशक्तिः फलमूलैश्च पानकैः जयशब्दैस्तथा नम
स्कारैर्गीतनृत्यादिभिस्तथा अर्चयित्वा प्रणम्येदं भक्त्या विज्ञापयेद्धि भोः ॐ प्रातस्त्वं पूजयामीश तन्मे सन्निधिं कु
रु भक्तस्य तव वात्सल्यात्तथा दीनानुकंपया एवमस्त्विति तेनोक्तं श्रद्धया भावयेद्धिया भक्त्या प्रातः स्मरेद्देवं भक्त
ये हूं तथा च वं अपि स्मरेत्त्वं भूयस्त्वद्रूपस्य चलनादिषु प्रातरुत्थाय तेनैव विधिना पूजयेद्धरं विज्ञापयेदिदं लिंग व
न सन्निहितस्तथा ततोऽध्यामि महिष्यामि प्रातस्त्वं पूजयाम्यहं तत्र विघ्नं क्षमयमेश श्रद्धाभक्तिप्रयत्नमे लिंगे सि
न्भगवान्प्रभो सदा सन्निहितो भव शृङ्गारणार्चा महादेव कृपया भक्तिवत्सल एवं भक्तिं विनिप्रोक्तं भावयेद्धि
नाधिया ततः प्रातः समुत्थाय विशेषेण समर्चयेत् लिंगस्य मस्तिस्थमथो गुरुः शिष्याश्रितं यजेत् अन्नं दद्या
द्यथाशक्तिर्गोब्राह्मणतपस्विनां संतर्प्य तान्वदेत्तेषां भगवान्प्रीयतामिति देवः शिवस्ते प्रीतोऽस्तु तैरुक्तः श्रद्धया
न्वितः भक्त्या विज्ञापयेद्धेवं नाथैषयमेव च तद्दर्शी यावित्तं त्वत्प्रसादेन देहि मे अभिहितं फलं जप्यो होमो जपस्तुतः पुनः
पूज्यपूजकः ध्यानं ध्येयं तथा ध्याता त्वमेव परमेश्वर ध्यानं ध्येयं तथा ध्याता जप्यो जप्यो जपिता जपः विस्व
ज्यभक्त्या देवेशं भुंजीत त्रीह्यसेवितं मनुष्यंमंत्र्य ब्राह्मणे दद्यात्स्वयमेतत्समाहितः लिंगार्चावत्स्थले पूज्यपात्रे वा ।
जलपूर्वमिति स्नानानि दद्यादाद्यं भक्तितोऽधिकं मानसा चरेत् एवं मासे द्वादशाकं मासांते पारयेद्व्रतं पादे एष परमो ।
शानं पुनर्विज्ञापयेदिदं यावित्तं त्वत्प्रसादेन शिवाराधनमीश्वर जन्मेमाममयं लोभान्पूर्णकामो मन्मेऽस्तु वि

कृ॰ च॰ ७
२

तथैवं यथाशास्त्रादृष्टाहि विप्रेषु दक्षिणां एवं कृत्वाभिलषितं यदस्य मनसो भवेत् तत्प्राप्नुयादविरतयाग
कैर्नद्रत्वमवाप्नुतं वर्षेणैकेन तत्रेन तत्फलं प्रोक्तं व्रतस्यास्य यावज्जीवं कृतव्रतां फलं वक्तुं न शक्यते मंडलेवाह
३ जयेतत्तमैदैशानसंशयः सर्वतीर्थमयो ह्येवव्रतथा तैस्वयत्फलं तदस्य स्यायशुणितविंशेयव्रतपारणात्
नारीशुद्धसमोपेताकृत्वैतद्व्रतपारणं फलं नैवं तिसंधाय कृत्वा ब्रह्मेति प्राप्नुते एवमेव विधिर्द्वैयिकृत्वा
स्वद्वादश्यांशुच उपवासविधिः कुर्यान्नदन्नेथवभोजनं याहश्यांनाहश्यांवापि वस्रोपोष्यादिनेदिने भक्त्यार्चये
न्महादेवलिंगयाद्यकायंपरं दिनेदिने तद्देवेशमर्चयित्वा यथाविधिः भुंक्तेपि वतिनूनं समदशोभवतिहृति
तस्य दर्शनसंभाषात्स्पर्शनात्स्मरणादपि महापातकिनां पुंसां पापं यात्यपि भस्मसात् तस्मात्सर्वप्रयत्नेन भक्त्या
श्रद्धया विधिपूर्वकं अर्चनीयः शिवो देवः सर्वसिद्धिफलेप्सुभिः इति निशासमाप्तं तच्चतुर्दश्यां शिवोद्दिते
व्रते विधिसमुद्दिष्टः शिवरात्रमथोच्यते अथात्यमृतेन गेअथातः संप्रवक्ष्यामि व्रतानामव्रतमुत्तमं येनैव कृ
तमात्रेण भोगमोक्षफलं लभेत् कृष्णपक्षे चतुर्दश्यां भक्त्या संपूजयेद्धि तु द्वादश्यामथवारंभ चतुर्दश्यां समा
मारभेत् कृतोपवासः स्नानादिनित्यनैमित्तिकं विधिं गीतमंगल्यघोषेण धूपदीपानुलेपनैः वासोभिः शय
कामतं= नीयैस्तु कलशेषु प्रपूजयेत् पंचैर्द्वादशभिर्युक्तं कलशं विलिखेद्भुवि तत्स्थानेकलशानां तु द्वादशानां यथा
क्रमात् भुक्तिमुक्तिफलायालं पूज्याफाल्गुणमासतः माघेतं प्राच्यशात्मादीन्नुक्त्वा द्वादशसंख्यया पूर्वमीशा
नपर्यंतं कलशेषु च विन्यसेत् त्रयोदशाकर्णिकायां ब्रह्मास्वस्थासहन्यसेत् चतुर्दशोमंडलोर्ध्वशक्तियुक्तोमहे २

स्वरः पूजयेद्विधिनानेनदेहन्यासंपरंस्पृशेत् योऽरुद्रोऽग्नौहृदये ब्रह्मादेवानां शिरसि प्रतिष्ठितस्तिशि
खायां शूलकर्णयेतिकवचे उग्रनन्दयेतिनेत्रयोः पद्मांशूद्धेतिपादयोः यथादेहेतथादेवेन्यासकर्मसमा
चरेत् फाल्गुणेशिवइत्युक्तउमयासहितस्तथा चैत्रेकात्यायनीरुद्रोवैशाखेवृषाकपिः गौर्यासह
ततोज्येष्ठेकाल्यासहहरस्तथा आषाढेहैमवत्याचसहितस्त्र्यंबकःस्मृतः श्रीकंठःश्रावणेज्ञेयोगोर्घया
सहितस्ततः भवोभद्रपदेमासेशिवयासहपूजयेत् ईशानाश्वयुजेमासिभवान्यासहपूजयेत् कार्त्तिके
शर्वइत्युक्तोरुद्राण्यासहपूजयेत् मार्गशीर्षेमहादेवःशर्वाण्यासहपूजयेत् पौषेपशुपतिःपूज्यस्त
थाचैवसर्वमंगला माघेमाहेश्वरोदेवोपर्णयासहितस्ततः एवंक्रमेणपूर्वेद्युरात्रौकृत्वाप्रजागरं ॐका
उमासहितायशिवाय चै कात्यायनीसहितायरुद्राय वै गौरीसहितायवृषाकपये ज्ये कालीसहि
तायहराय आ हैमवतीसहितायत्र्यंबकाय श्रा ईश्वरीसहितायश्रीकंठाय भा शिवासहितायभ
वाय अ भवानीसहितायईश्वराय का रुद्राणीसहितायशर्वाय मार्ग शर्वाणीसहितायमहादेवा
य पौ सर्वमंगलासहितायपशुपतये मा अपर्णासहितायमहेश्वराय १३ सृष्टिसहितायब्रह्मणे १४
अथान्यमतेन मोक्षार्थे मार्गशीर्षादारभ्यनामानि ॐउमासहितायहंसाय पौ दुर्गासहितायप
शुपतये मा भद्रकाल्यासहितायभीमीषणाय फा स्वस्तिसहितायकपर्दिने चै स्वाहासहितायब्र
ह्मणे वै मनोरमासहितायउन्मनेश ज्ये सिद्धिसहितायमहाहंसाय आ वृद्धिसहितायविसर्गाय

रु० च ओं तुष्टिसहिताय पुरुषाय भों प्रीतिसहिताय प्राणाय ओं पुष्टिसहिताय ईश्वराय कों अभयासहि
उ० ताय शिवाय ऋत्विग्भिस्तेन कर्तव्यं जपहोमादिकं च यत् अनयानेत्रयोदश्यां चतुर्दश्यां समापयेत् रात्रौ
४ जागरणं कुर्यात्समिधा होममेव च पलाशसमिधः कुर्यादष्टोत्तरशतं बुधः यो रुद्रो अग्नौ मंत्रेण घृतपायसं
च होमयेत् ततः पंचामृतं होमं मनसाष्टोत्तरशतं यो रुद्रो अग्नौ मंत्रेण जुहुयाद्विचक्षणः रात्रिसूक्तं ततः
पश्चात्तत्र रक्षोघ्नमेव च पूर्णकुंभोपरि स्थाप्य पूर्णपात्रसमन्वितं सौवर्णं रौप्यजं वापि ह्यथवा ताम्रमेव
वा शिवस्य प्रतिमा कार्या देशकालानुसारतः एकविंशति स्नानानि धूपदीपानुलेपनं ततः प्रभाते संप्रा
प्ते ब्राह्मणान्पूजयेद्बहून् देवान्पितॄंश्च संतर्प्य ऋषींश्चैव तपोधनान् शुक्लपक्षे चतुर्दश्यां व्रतं होमेन कार
येत् तस्मात्सर्वप्रयत्नेन भुक्तिमुक्तिफलं लभेत् अथात्र तंत्रविधिः गोमयेन भूमिमुपलिप्य पंचगव्येन शो
धनं कार्यं अथ पंचचूर्णेन ग्रहमंडलं समुल्लिख्य ततः दक्षिणतः द्वादशकलशान् पञ्चपत्रदलोपरि स्थापयेत् तत्कल
शमंडलमध्ये त्रयोदशकलशं उपरि चतुर्दशं स्थापयेत् ततो भद्रपाठादि शन्नो देवीरित्यंतमर्चयेत् त
तः अग्रहाकलशे यो रुद्रो अग्नौ २ ओं नमः शिवाय इति मंत्रद्वयं पूज्य अग्नये नमः ततः दक्षिणकलशमं
डले पूर्वादिक्रमेण यो रुद्रो अग्नौ मंत्रेण प्रत्येकं पुष्पं क्षिपेत् ततः इंद्रपर्वतादि ऐंद्राभिवर्म इत्यंतं याग
मर्च्य मधुपर्कं निवेदयेत् ततो यजमानो दक्षिणत उपविश्य न्यासकर्म कुर्यात् ओं यो रुद्रो अग्नावितिहृद
ये यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु देवाः ४

ब्रह्मादेवानां शिरसि प्रतद्विष्णुरिति शिखायां शुक्लज्योयेति कवचे शुक्लज्योयकवये विद्याय वाचोभिर्नाकस्तु
पयामिध्यांसन् यतोभयमग्नयंतन्नोअस्त्वये देवानामभक्षेडाइद्ध उग्रश्चयेतिनेत्रयोः उग्रन्नधमित्रमहश्राग्रावोहस्तु
नराह्विं हृद्रोगममसूर्यहरिमाणंचनाशय पद्भ्यांसूद्देतिपादयोः अग्नस्तु यातेरुद्रशिवातनूरितिशिरसि या
तेरुद्रशिवातनूःशिवाविश्वाहभेषजी शिवारुतस्यभेषजी तयानोमृडजीवसे असंख्याताइतिललाटे अस
ख्यातासहस्राणियेरुद्राअधिभूम्यां तेषांसहस्रयोजनेवधन्वानितन्मसि येनीलग्रीवानेत्रयोः येनीलग्रीवाः
शि॰ ९ शितिकंठादिवंरुद्राउपाश्रिताः तेषां येनीलग्रीवाः शितिकंठाश्शर्वाअधः क्षमाचराः तेषां त्र्यंबकंयजामहे
इतिनासिकायां त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् अवतत्य
धनुस्त्वमितिमुखे अवतत्यधनुस्त्वंसहस्राक्षशतेषुधे निशीर्यशल्यानांमुखंशिवोनःसुमनाभव आभ्या
मुतनेनमइतिबाहुभ्यां आभ्यामुततेनमोबाहुभ्यांतवधन्वने अवतत्यधनुस्त्वंसहस्राक्षशतेषुधे येतीर्था
निस्तनयोः येतीर्थानिप्रचरंतिसृकावंतोनिषंगिणः तेषां नमोवःकिरिकेभ्योहृदये नमोवःकिरिकेभ्योदे
वानांहृदयेभ्यो नमोविचिन्वत्केभ्योनमोविक्षीणकेभ्योनमआनिर्हतेभ्यः द्रापेअंधसस्पतेहो द्रापेअंधसस्प
तेदरिद्रन्नीललोहितः आसांप्रजानामेषांपुरुषाणामेषांपशूनां अग्निर्मूर्धेतिवृषणयोः अग्निर्मूर्धादिवः
ककुत्पतिःपृथिव्याअयं अपांरेतांसिजिन्वति येवनेषुशष्पिंजरजंघयोः येवनेषुशष्पिंजरानीलग्रीवा
विलोहिताः तेषां येपथीनांपथिरक्षमितिपादयोः येपथीनांपथिरक्षयऐडस्वदायव्युधः तेषां अध्य

शू॰ च
उ॰
५

वोचदिति कवचे अथ वोचद्धिवन्धा अथ मो देव्यो अभिषेक ओं ह्रीं श्रं सर्वविघ्नं भय सर्वाणि यातुधान्यो धरावी:
पराभव येचेमेरुद्र इति दिग्बंध: येचेमेरुद्रा अभितो दिक्षु श्रिता: सहस्रशो वैषां हेडंईमहे नमोस्तु नील
ग्रीवाय इति दिक्षु नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे अथो ये अस्य सत्वानो हं तेभ्यो करन्नम:
तीर्थस्तेय वरुणपवित्रमसि आपोहिष्ठादि आत्मपूजा धूपदीपो संकल्प ध्रुवाद्यौरित्यासनमुद्रा भद्रासनोपवि
श्य प्रतिमास्थापयेत् अश्विनोरिति जीवादानं देहवत् देवस्य न्यासं कुर्यात् पयो दधि घृतं मधु इति एकवि
शति स्नानानि प्रथमतो दद्यात् पुन: पानीयान्तरितै: पयो दधि घृतैस्तोद्वेत्तभिस्सौषधी व्रीहद्भि: कुश मो
दकै: फलजलसिद्धार्थ लाजोदकै गंधाद्भि: शुभैर्हेमरत्नसलिलैस्तीर्थसदाद्युतमेदद्यात् पंचदशगुणानां सह
महास्नानानि शंभो: क्रमात् येभिर्दिव्यैर्मिश्री कृत्य रुद्रमंत्रै: शंभुं स्नापयेत् देवस्य पादाग्रे देवान् ऋषीन् पितृ
न् तर्पयेत् यो रुद्रो अग्नाविति मंत्रगडूकै रक्षोहणमित्यापाप्रातिकामावावस्तु तत्पुरुषाय ऊं मकर्ष्यैश्चंदनानु
लिप्तां प्रतिमां रथे अग्ने देवेति अनुलेपनं प्रतिमा ऊर्ध्व ऊं भो परिमथ्ये कर्णिकास्थापयेत् ध्रुवाद्या: तत:
ध्यानं कुर्यात् ऊं भूर्भुव: स्वरुपमावाहयामि ऊं भूर्भुव: स्वस्तत्सवितु: इ श्रीवेदव्यास ऋषि: रुद्रो देवता गाय
त्रीछंद: ध्यानादौ विनियोग: ऊं सर्वेश्वराय विद्महे शूलहस्ताय धीमहि तन्नो रुद्र: प्रचोदयात् इ अथ ता
वत् गणपते: कुमारस्य प्रिय: सरस्वत्या: लक्ष्म्या: विश्वकर्मण: द्वार देवतानां प्रजापते: ब्रह्मण: कलशादे
वतानां ब्रह्मा विष्णु महेश्वराणां चतुर्वेदेश्वरस्यमातुश्वरस्य मासपते विष्णो: मासपते: शिवस्याग्रे ईनत: ५

पूर्वे ईशानादि उमासहितस्य शिवस्य १ कात्यायनीसहितस्य रुद्रस्य २ गौरीसहितस्य वृषाकपेः ३ का
लीसहितस्य हरस्य ४ हैमवतीसहितस्य त्र्यंबकस्य ईश्वरीसहितस्य श्रीकंठस्य शिवासहितस्य भवानी
सहितस्य ईश्वरस्य रुद्राणीसहितस्य शर्वस्य शर्वाणीसहितस्य महादेवस्य सर्वमंगलासहितस्य पशु
पतेः अपर्णासहितस्य महेश्वरस्य पार्वतीसहितस्य शिवस्य मध्ये सृष्टिसहितस्य ब्रह्मणः १३ ऊर्ध्वे शा
न्तिसहितस्य अनन्तेश्वरस्य १४ तथा इन्द्रादीनां समस्तकलशचतुर्दशीव्रतोद्यापनदेवतानां आत्मनय
शोत्फलप्राप्त्यर्थं कृष्णचतुर्दशीव्रतोद्यापननिमित्तं शिवपूजनं कलशपूजनं यागपूजनमर्चां महत्क
रिष्ये ओं ऊरुणु यवान्विकीर्य ध्रुवाद्यौः भगवतः उमासहितस्य इदमासनं नमः ततः गणपतेः कुमारस्ये
त्यादि मासपतेर्विष्णोः मासपते शिवस्येदमासनं नमः १२ सद्योजातायवै नमः इत्यासनं मध्ये सृष्टिसहि
तस्य ब्रह्मणः ऊर्ध्वे शान्तिसहितस्य अनन्तेश्वरस्य इदमासनं नमः ततः इन्द्रादीनामिदमासनं नमः उमा
सहिताय शिवाय चतुर्दशीभ्यः शिवेभ्यः इन्द्रादिभ्यः समस्तयागदेवताभ्यः युष्मान्वः पूजयामि ओं पूज
य एता देवता आवाहयिष्यामि सद्योजातं प्रपद्यामि ओं आवाहय यवान्विकीर्य इत्यावाहनं लिंगेस्मि
न्भगवान्शम्भो सदा सन्निहितो भव गृहाणार्चामिमां देव कृपया भक्तिवत्सल आवाहयाम्यहं देवमीश
ं पार्वतीपतिं वृषभासनमारूढं नागाभरणभूषितं प्रीयतां यजमानस्य वरदो भव जगत्पते बलिः सुष्ठं
वहं चैव धूपोयं प्रतिगृह्यतां यो रुद्रो अग्नाविति मंत्रः ततः प्राणायामं शन्नो देवी लाजाश्च भगवतः या

शिवाय

शं० च
उ
६

द्यं २ हिरण्यवर्णेति पाद्यं भवेभवेनातिभवेतिपाद्यं उमासहितायपाद्यंनमः गणपतयेकुमारायपाद्यंनमः ई
शानादिकलशानां उमासहितायशिवायपाद्यंनमः ४ इंद्रादिभ्यःपाद्यंनमः पुनःशन्नोदेवी आपःस्तीर्भगवं
नःअर्घ्यं २ आपोहिष्ठा ३ भवोद्भवायनमः इत्यर्घ्यं उमासहितशिवरुद्रदेवःअर्घ्यंनमः शन्नआपइत्याचमनीयं द्वा
दशामइतिमंत्रस्नानं गंधद्वारेतिगंधं कलशायनमः इतिगंधं उमासहितायशिवायसमालभनेगंधोनमः क
लशानांयागस्यच एवंक्रमेण पुष्पवतीतिपुष्पं कलविकरणायनमइतिपुष्पं उमासहितायशिवायअर्घ्योनमः
पुष्पंनमः गणपतयेकुमारायेत्यादि मासपतेविल्वे ईशादिकलशानां उमासहितायशिवायअर्घ्योनमः
पुष्पंनमः इंद्रादिभ्यःसमस्तयागदेवताभ्यः अर्घ्योनमः पुष्पंनमः ततोरुद्रमंत्रैः शिवस्पुष्पपूजाकार्या ॥
ॐभवायदेवायनमः शर्वायदेवायनमः रुद्रायदेवायनमः पशुपतयेदेवायनमः उग्रायदेवायनमः महादेवा
यनमः भीमायदेवायनमः ईशानायदेवायनमः अर्घ्योनमः पुष्पंनमः धूरसीतिधूपः सर्वभूतदमनायन-
इतिधूपः तेजोसीतिदीपः मनोन्मनायनमः दीपः धूपोनमः दीपंनमः एतासांदेवतानामर्घ्यपूजानाद्यर्चना
विधिस्सर्वःपरिश्रुर्मोस्तु सावित्राणि ओष्ठायनमः मधुपर्कनमोनैवेद्यं भवोद्भवायनमः इतिनैवेद्यं शिवा
यसपरिवारायचतुर्दशशिवेभ्यः समस्तयागदेवताभ्यः दधिमधुपर्कनैवेद्यंनिवेदयामिनमः हिरण्यगर्भः
ततः उपस्थानं ॐतत्पुरुषायविद्महे महादेवायधीमहि तन्नोरुद्रः प्रचोदयात् ॥ ईशानःसर्वविद्यानामी
श्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवो योरुद्रोअग्नाविति अर्घ्यप्रदक्षिणं ६

देवंस्वधाकलशासोमकरंत्रिनेत्रंपद्मासनेवसुधं शूलाभयाब्जवरभूषितयादेव्यावामेंकितंशमनभंगहरंन
मामि अर्घ्ययथा शान्नोदेवीः अपोष्ठानेनमः आचमनीयंनमः शान्नोदेवीः दक्षिणाये एतायागदेवतास्स
दक्षिणानेनप्रीयंतांप्रीताभवंतु ॥ ततोग्निकार्मं अग्निंपरिसमूह्यपर्युक्ष्यपरिषिच्यपरिस्तीर्य सावित्राणि
उमासहितायशिवाय २४ गणपतये कलशचतुर्दष्ट्रींब्रतोद्यापनदेवताभ्यः जुष्टंनिर्वपामि एवंप्रोक्ष्यामि ए
वंप्रोक्षणं आज्यभागांतंहुत्वा आदौसमिधहोमः योरुद्रोअग्नाविति अष्टोत्तरशतंजुहुयात् ततनिषुसीदग
णपतेसर्वंमृचकंसमिधहोमेनजुहुयात् ततःपंचामृतेनअन्नेनयोरुद्रोअग्नौ २८ निषुसीदगणपतेएकाग्नेत
जुहुयात् ततःआज्यहोमः तर्पणंकुर्यात् कूष्मांडआज्यहोमेन ततोयवतिलतंडुलहोमः इदंहविस्मृतमभि
घार्य अग्नयेस्वाहा वायवेस्वाहा सूर्याय ब्रह्मणेस्वाहा प्रजापतयेस्वाहा कूष्मांडिभ्यःस्वाहा इत्यादियवति
लहोमः द्रव्यविचार्यब्राह्मणान्सुत्वा निहोमयेत् पृथक्पृथक् तर्पणंकुर्यात् आज्येनविस्तुपंचकंतर्पणंच
रुद्रपंचकंतर्पणं देवीपंचकंतर्पणं यवतिलेनरात्रिसूक्तं याजेषधयः रुद्रामंत्राणि ततस्तितिथ्यादिपरि
तेहरुभोरंतंहुत्वा हुतशेषेणनैवेद्यंस्विष्टभागांतंअग्नित्वंवैश्वानराय ततोमनोज्योतिरितिसमांतंहुत्वा ततः
प्रभातेचचतुर्दश्यांप्राग्नकलशानांवायागस्यप्रतिमायाःपूजनंकार्यं वैश्वदेवादिनैवेद्यान्तिनित्यकर्मकुर्यात्
ततोब्राह्मणपूजनं ॐभूर्भुवस्वः तत्सवितुः रु सर्वेश्वरायविद्महे शूलहस्तायधीमहि तन्नोरुद्रःप्रचोदयात्
रु अथतावत् अग्निर्यविष्टस्यसांतचरस्यादित्यस्यायर्याः ब्रह्माविष्णुमहेश्वराणांचाद्यर्वेदेश्वरस्यसांतचरस्य

कृ॰च
उ॰
७

मासपतेर्विष्णोः मासपतिशिवस्य २५ इन्द्रादीनां समस्तकृष्णचतुर्दशीव्रतोद्यापनदेवतानां आत्मनः यथोक्त
फलप्राप्त्यर्थं चतुर्दशीव्रतोद्यापननिमित्तं ब्राह्मणपूजनमर्चामहं करिष्ये ॐ कृष्ण यवान्विकीर्य दक्षिणांते
यागस्य पूर्णाहुतिं समापयेत् ॐ भूः पुरुषं विसर्जयामि ॐ भुवः पुरुषं विसर्जयामि ॐ स्वः पुरुषं विसर्जयामि ॐ भूर्भु
वः स्वः तन्महाविष्णुः सर्वेश्वराय ३ अद्यतावत् गणपतेः कुमारस्येत्यादि उमासहितस्य शिवस्य २५ इन्द्रादी
नां समस्तयागदेवतानां यथोक्तफलप्राप्त्यर्थं शिवपूजनं कलशपूजनं यागपूजनमच्छिद्रं संपूर्णमस्तु एवम
स्तु एताभ्यो देवताभ्यः यवोदकं नमः अक्षतं तर्पणं नमः ततः क्षमाश्लोकः आपन्नोस्मि फाल्गुणे मासि यो
देवो भक्त्या संपूजितः शिवः उमया सहितः सोद्य प्रीयतां मम शंकरः १ चैत्रे कृष्णचतुर्दश्यां मङ्गलायार्योर्चितः शि
वः कात्यायनीपतिः सोद्य प्रीयतां मम शंकरः २ वैशाखे कृष्णचतुर्दश्यां वृषाकपिः गौरीश्वरोर्चितः सोद्य प्री
यतां ३ ज्येष्ठे कृष्णचतुर्दश्यां पायः कालीसहितो हरः आराधितो मया सोद्य प्रीयतां मम शंकरः ४ आषाढे त्र्यंबको
भक्त्या हैमवत्यान्वितोर्चितः असितायां चतुर्दश्यां प्रीयतां मम शंकरः ५ श्रीकंठः श्रावणे कृष्णे चतुर्दश्यां मया
र्चितः ईश्वरीसहितः सोद्य प्रीयतां मम शंकरः ६ चतुर्दश्यां नभः कृष्णायां भवो भाद्रपदे विभुः शिवान्वितोर्चितः सो
द्य प्रीयतां मम शंकरः ७ ईशान आश्वयुक् कृष्णचतुर्दश्यां मयार्चितः भवानीसहितः सोद्य प्रीयतां मम शंकरः
रुद्राणीसहितः शर्वः कार्तिके पूजितो मया चतुर्दश्यामसितायां प्रीयतां मम शंकरः ८ शर्वस्य कार्तिके कृष्ण
चतुर्दश्यां मयार्चितः रुद्राणीसहितः सोद्य प्रीयतां मम शंकरः ९ महादेवोसिते मार्गशीर्षे पार्वत्या पूजितः च ७

त्वर्दश्यपर्चितः सोघप्रीयतांममशंकरः ९ यो देवैस्सितवृत्वर्दश्यपा सर्वमंगलयार्चितः देवः पशुपतिः सोघप्रीयतांम
मशंकरः ११ मार्यास्सितचतुर्दश्यां पार्वत्या सहितः शिवः भक्त्या संपूजितः सोघप्रीयतांममशंकरः १२ नैतेप्र
तिमायांत्वमाशुघ्याति उमया सहितो हंसो दुर्गया सहितः शुचिः ज्योतीरूपो भद्रकाल्या कपर्दी स्वस्ति संज्ञया
स्वाहया सहितो ब्रह्मा उन्मनः समनो रसः सिद्धान्वितो महाहंसो विसर्गो वृद्धिसंज्ञया महाभैरव नामा च त
था चंदनचर्चितः प्रीत्या प्राणेश्वस्तथा उग्राशास्त्रयम्बुशिवस्तथा अभयासहितो देवो भुक्ति मुक्ति फलप्रदः एते
संपूजिता रुद्राः प्रतिमासं मया विभो उपवासेन दानेन यमैस्तानियमैस्तथा त्वद्भक्त्या परमी प्राणन्प्रीता स्तेचास्य
संवमे प्राग्जन्मार्जितपापेनयाकाचिद्दुष्टभावना त्वत्तुनः कृतवानस्मि नामेनाशाय शंकर कैलासमेरुमंदारस्म
शश्री हिमसानुषु भूर्लोके चाथपाताले स्वर्लोके विविधेपि च तीर्थे देशान्तरे मूर्तौ सर्वत्रान्तर्बहिस्सुखे शुक्ले
शुचौ शिवगणो भूयासं परमेश्वर मानुष्येशुत्रयो गार्थ्यवाजिवारणवाहनैः आयुरारोग्यमैश्वर्यं सौख्यं सर्व
समृद्धिदं व्रतेनानेन मे देहि पूजितः परमेश्वर अखंडं चेन्मया किंचिद्वृतं न व्रतं विभो सर्वत्र त्वत्प्रसा
नकारणं शरणं मम त्वत्परः को स्मि सोन्योयस्त्व खंडखंडयेत्प्रभो अपूर्णपूरयस्वेच्छापि स्वहिंसंहारकारक
किन्नाममंत्रैर्न किंच दानं किंचैव पूजनं वराकामानुषाः जग्मुर्यत्र देवालयं गताः भक्तिमात्रमिदं सर्वं देवाग्र
ह्यादयोपि ते शिवः प्रत्यर्द्दवाकस्याऊर्वीरन्भोगलिप्सया १ मामेश त्वं माच मे दास भावो मामूर्खत्वं मा
ऽदेशे शुजन्म मिथ्यादृष्टिर्माच मे स्यात्कदाचिज्जातो जातो शंभुभक्तो भवेयं आद्यानेनैवनामानिनेवजा

कृ·स्म·च
१८

नाभिपूजनं विसर्जनं नजानामि हृद्यम स्वपरमेश्वर नमोब्रह्मणे ततः कलशप्रतिपादनं सावित्राणि
आत्मनः यथोक्तफलप्राप्त्यर्थं उमासहिताय शिवाय उमासहितं शिवः कलशं सहिरण्यं सवाससंस्रा
वं ददाति प्रतिगृह्णामि एवंसर्वेषां ततः प्रतिमां हृद्विदद्यात् सावित्राणि आत्मनः शुभफलप्राप्त्यर्थं शिव
प्रतिमां सहिरण्यं सवाससं ससंभारं ददाति ततः तर्पणं ततो दध्यन्ननतिलैः यैश्चरंति सदा मरौ उद्यापनस्य
तद्दृष्ट्यान्तमिमायांसर्वदा ब्राह्मण्योद्यापनं जले लिखितं ततो ब्राह्मणपूजनं समापयेत् शास्त्रवत् पूर्णां
दत्वाग्निं विसृज्य उत्तिष्ठ ब्रह्मणस्पते इति श्रीकालभैरवाष्टमीव्रतोद्यापनं प्रभाते नक्त उत्थाय स्नानं कृत्वा विधा
ननित्यं नैमित्तिकं काम्यं यथावद्दत्वपूर्वशः हस्तमात्रे ततः कुण्डे कार्यं तत्रिमेखले परतो लोकपालांश्च
ब्रह्माणं गोमयविष्टरे संस्थाप्य स्तन्वीय हृद्धिः समिधा होममेव च घृतमष्टोत्तरं दद्यात् अघोररुद्राय औं इति स्मरेत् अथ
रुद्रस्य वामादीन् मंत्रैश्चैवाज्यहोमयेत् घृतं पंचामृतं चैव सर्वौषध्यश्च होमयेत् सुवर्णरजतं वापि शिव
स्य प्रतिमां तथा सपत्नीवा स्वतश्चैव वृषभां च गवां सह पूर्णकुम्भो ‥ ‥ ता पूर्णपात्रसमन्विता एक
विंशति स्नानादिकं चैव वानुलेपनं होमान्ते पूजयेद्विप्रान् दक्षिणाया यथाशक्तितः कृत्वा गां वृषभं सुतं शि
वस्य प्रतिमां तथा दत्वा चैव तु विप्राय पूर्णं तत्र समापयेत् ब्राह्मणान् भोजयेद्वाथ शिवभक्तान् विशेषतः
न ‥ शिवस्य कृपया पुत्रबन्धुभिः सार्थभिः सह भोजयित्वा विधानेन विसृजेत् परमेश्वरः कृत्वा सर्वं प्रयत्ने ८
न भोगमोक्षफलं लभेत् ॥ ॥

आदौ ब्रह्मकलशं संपूज्य ततन्यासं चतुर्वेदिमध्ये ब्रह्मकलशं संस्थापयेत् आकृष्णेन रजसा हृदयाय
नमः वर्तमानो निवेशयन् शिरसे स्वाहा नमृतं मर्त्यं च शिखायै वषट् हिरण्ययेन कवचाय हुं
आ देवो याति अस्त्राय फट् या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु तेभिर्नो विश्वैः सु
मना अहेडन्राजन्सोमं प्रतिहव्या गृभाय या ते धामानि दिवि या पृथिव्यां हृदयाय नमः या पर्वतेष्वोषधी
ष्वप्सु शिरसे स्वाहा तेभिर्नो विश्वैः सुमना शिखायै वषट् अहेडन्राजन् कवचाय हुं सोमं प्रतिहव्या गृभाय अस्त्रा
य फट् तीर्थे स्नेयमित्यादि धूपदीपौ संकल्प्य ध्रुवा द्यौरिमं अश्विनौ देहवद्देवे न्यासं कुर्यात् ॐ भूः।
पुरुषमावाहयामि ॐ तत्सवितुः ३ ॐ अद्यतावत् चंद्रमंत्रः महागणपते इत्यादि अमेवायो इत्या
दि इंद्रादीनां वास्तोष्पतिदेवतानां क्षेत्रेशानां चंदनं षष्ठीव्रतोद्यापनदेवतानां आत्मनो वाङ्मनः
कलशपूजनमर्चामहं करिष्ये ॐ कुरुष्व यवान्विकीर्य एवं क्रमेण दक्षिणांतं कार्यं ततोऽग्निकर्म चंद्र
मंत्रः प्रातमष्टोत्तरं जुहुयात् निषुसीदगणपते ऋचैकेन समिद्धोमः एवमाज्यहोमः तर्पणं आज्ये
न कूष्मांडहोमः ततो यवतिलहोमं ततः चंद्रोदये प्रशस्तकाय चार्घ्यं दद्यात् क्षीरसागरइति ततोऽव
वतिष्यादि इडाभागं च मनोज्योति ततः प्रभाते स्नात्वा सूक्ष्मक्रमेण न्यासं नैवेद्यं अग्निविष्ट ब्राह्मण
पूजनं पूर्ववत् कलशे पुष्पां संपाद्य आपस्त्रोसि इति आह्वानं उदकलशं शुभमस्तु ॥ ॥ ॥

द्वा॰उ
५

ॐ स्वस्ति ॐ अथातः संप्रवक्ष्यामि द्वादश्योद्यापनं मुने येनैव कृतमात्रेण नरः पूर्णव्रतो भवेत् एकादशीसमा
साद्य शुक्लपक्षस्य वै तिथिं एतां यजिनाहुरिलक्ष्मीं ततः कर्म समारभेत् भूमिभागे समे शुद्धे पंचगव्यसमुक्षिते
तस्मिन्नेवाष्टदलं पद्मं पंचरंगैः सुशोभितं संस्थाप्य तत्र देवेशं विधिनानेन सुव्रत जितं ते मंत्रमुच्चार्य त्रिरिदं च
पुनः पठेत् श्रद्धया परयोपेतं कृतांजलिपुटो व्रती ॐ भगवन्पुंडरीकाक्ष भक्तानामनुग्रहकारक अस्मद्धृदयात्तु
शीघ्रमत्र सन्निधानं कुरु प्रभो इत्यावाहनमंत्रः ॐ वासुदेवाय विद्महे नारायणाय धीमहि तन्नो विष्णुः प्रचो
दयात् ३ इत्यावाहयेत् गायत्रीं त्रिः समुच्चार्य तत्ववित् मनसा चिंतितैर्द्रव्यैर्देवमात्मनि पूजयेत् तेजोरूप
ततः स्थित्वा प्रतिमायां पुनर्यजेत् शन्नो देवीति मंत्रेण पाद्यमस्मै निवेदयेत् आपो हि ष्ठेति तिसृभिरर्घ्यं
वासे प्रकल्पयेत् इदमापः इति स्नानं तिलादनपयोहुतैः गंधवत्यानतो गंधं पुष्पं पुष्पवती पठेत् वस
वस्त्रं समुच्चार्य धूपं देवे निवेदयेत् तेजोसि शुक्रमसीति दीपं चापि निवेदयेत् मधुपर्कं यथाहिष्टं मात्राम्रू
लफलानि च नीलोत्पलदलश्यामः प्रफुल्लजलनेत्रणः जलपूर्णार्घ्यजगघोनि प्रीयतां मम केशवः यदि
त्वेष्मै नैवेद्यं विधिना कल्पयेद्बुध मार्गशीर्षादिमासोक्तैः पंचविंशतिनामभिः अभ्यर्चयेत्सपत्नीकं साधु
धं सपरिच्छदं निवर्त्यं ततः पश्चाद्वृद्धिकर्म समारभेत् पर्वतं त्रेन ततः स्नात्वा पालाशस्समिधाः शतं अष्टोत्तर
मतो देवाद्वेन्द्रवाज्ञयान्मुने एवं संख्याच तद्विसोवितिकृग्भ्य मंत्रितः दूर्वांकुरैर्योद्वितीयोऽजुहुयात्तदनंतरं पंचा। ५

मन्त्रं पठेत् मंत्रं प्रतद्विष्णुरिति प्राग्वदेवमहात्मने ततस्तु पीठस्थं स्नातं श्रीमत्कांचनतोयजेत् कूष्माण्डानि ततः पश्चा
द्यजेन्मंत्रांस्तु वैष्णवान् रात्रौ चंदनस्थाप्य तं जुहुयाद्दत्तौ तैस्तिलैः तावद्यावद्यामवतीतयमायाति ह्स्वत्त ततः
प्रभाते संप्राप्ते ब्राह्मणान्पूजयेद्बहून् तेभ्यस्तान्कलशान्दद्यात्सहिरण्यान्सवाससान् भगवंतं ततो होत्रे प्रयच्छेद्दे
शशायिनं दुग्धाब्धौ भोगपर्यंकतं लक्ष्म्या च तयान्वितं सौवर्णं भूमिगोवस्त्रकांचनं सहितं तु तत् इदं कुर्वीत ततः पश्चा
त्क्षमापनाय तु हव्ये भुवि अज्ञानाज्ज्ञानतो वापि यातन्यूनाधिकं च यत् दासस्य मम दीनस्य तत्क्षंतव्यं पुरुषोत्तम इत्युक्त्वा
ल्वव्रतं चीर्णं भगवन्यन्मया हरे तदद्य पूर्णमिच्छामि त्वत्प्रसादाज्जनार्दन मार्गशीर्षादिमासेषु शुक्ले कृष्णेषु वै द्विज
व्रतं चीर्णं सपत्नीकं प्रीयतां मे न मे हरिः अज्ञानाज्ज्ञानदौर्बल्याद्दूरकालादिविघ्नवात् असंपूर्णं स्थितं यन्मे स्या
यात्संपूर्णं मया नत् मार्गशीर्षे मया देव यद्व्रतं कृतमच्युत प्रीतो मे भवतां तेन सजायो क्लेशकेशवौ १ पौषे मा
सपि देवेश यद्व्रतं कृतमच्युत तेनानंत सपत्नीकः प्रीतो नारायणोस्तु मे २ माघे चिंतो सपत्नीका वच्युतो
माधवस्तथा अनेन तोषितावद्य प्रीतो स्यातां जनार्दन ३ फाल्गुणे यद्व्रतं देव कृतं तेनापि मे हरे विष्णो शो चक्रि
गोविंद प्रीयतां मम शांतिदौ ४ चैत्रे वैकुंठविष्णुस्त्र सजायौ तोषितौ मया येन व्रतेन तेनाद्य सजायौ शर्म यच्छतां
जनार्दनश्रीवत्वे शाखिनथैव मधुसूदनः अर्चितो यो मया पूर्वं प्रीतो स्यानो मम माघतौ ६ ज्येष्ठे चिंतो मया सर्वे पु
यंद्रोथ त्रिविक्रमः तुष्यतां तो व्रतेनाद्य कृतेन सपरिष्कृतौ ७ आषाढे पूजितो यच्च यत्नपुरुषवामनो अद्यतो
मे सपत्नीको प्रीतो तो मद्य केशवो ८ वासुदेवः श्रीधरश्च श्रावणे सपरिष्कृतौ व्रतेन देवदेवेशस्त्वप्रीतो शर्म

द्वा॰ ३
१

यस्थितां ९ त्रिनेत्रनेत्रोविनेत्रोपूर्वेनभस्मामासितोमया तोमेहरिहृषीकेशोप्रीयतांममपरिश्रुदे १० यो
गेश्वरःसपत्नीकःपद्मनाभस्तुतोषितः योमयाम्बुजेमासिप्रीतोस्यान्नाममयतो ११ कार्त्तिकेपुंडरीकाक्षस्त
थाद्यमोदरोविभुः तोषितोयोसपत्नीकोप्रीयतान्मयतोमम १२ एवंदेवोजगद्योनिश्चतुर्विंशतिनामभिः
चतुर्विंशतिपत्नीकःप्रीयतांमेजगत्प्रभुः १३ यद्बाल्येयच्चकौमारेयद्यौवनेकृतंमम वयस्थरमिदंयच्चयच्चज
न्मांतरेषुमे तन्नारायणगोविंदत्वमस्तुगरुडध्वज मामेत्वंमाचमेदासभावंइति १४ इतिनमः अथतर्पण
ततोदर्भाक्षततिलैरिमंमधाज्यमिश्रितैः तर्पयेदुदकैर्देवान्ऋषीन्पितॄंश्चक्रमात् प्रागाननोदेवऋषीन्द
क्षिणाभिमुखःपितॄन् येचरंतिसदामेरौब्रह्मणाधिष्ठितास्सुराः तृप्तिमायांतुतेसर्वेब्रह्मादर्पणोद्यापनाद्धरे
कैलासवासिनोदेवाशिवध्यानरताश्चये तृप्तिमायांतुतेसर्वेब्रह्मादर्पणोद्यापनाद्धरे भोगलोकागतायेचहा
टकेचार्चनेरताः तृप्तिमा॰ अथऋषयः अत्रिवसिष्ठपुलहाःकश्यपोगौतमस्तथा च्यवनोव्याघ्रपादिश्चदे
वलोकेमहर्षयः तृप्तिमा॰ कश्यपोवेददीर्घतपश्चराशपार्थश्चपराशरः विश्वामित्रोथजाबालिर्भरद्वाजस्तथाशौ
नकः सनंदपिप्पलादश्चबोढुःपंचशिखस्तथा लोगाक्षिकपिलःकठोहारीतोजमदग्नयः आपस्तंभः
सुमंतुश्चशंखश्चभृगुमरीचयः याज्ञवल्क्योमनुर्दक्षोबोधायनवलायनौ ऋष्यशृंगोथउशिकोगर्गयस्का
विटादयः इत्येतेऋनिवरश्रेष्ठाख्यातास्स्वनामभिः अन्येनाख्यातनामानऊर्ध्वरेताश्चयेद्विजाः तृप्य
न्त्वृषयस्सर्वेब्रह्मादर्पणोद्यापनाद्धरे पितरः अपसव्येन पितापितामहश्चैवतथैवप्रपितामहाः आयांतु १०

तृप्यंतु सर्वे द्वादश्योद्यापनाद्धरेः तथामातामहश्चैवप्रमातामहएवच वृद्धःपूर्वोमातुलश्वशुरःश्वशु
रएवच आर्यांतु मातापितामहीचैव तथैवप्रपितामही मातामहीप्रपूर्वीचवृद्धश्वशुरीतथैवच न
प्त्रि श्वश्रूस्वसागुरुपत्नीराज्ञीमित्रस्यवातथा ननयास्तानयश्चैव स्वसामातृपितृस्वसा उपनीता
पितृव्यास्तुयेचान्येस्नेहभागिनः तृप्यंतु यमतत्कल्पास्वर्गलोकेनिवसंतिये अवीच्यंतर्गताये
चकुंभीपाकांतरेतथा रौरवेस्पोपभोक्तारोयेमहारौरववर्दिताः कालसूत्रोपतप्तांगोह्यसिपत्रवनेस्थि
ताः तृप्तिः व्रायतृष्णयासविष्टोलकतादतोभिष्टवर्त्मगः अन्यत्रवायत्रतत्रयातनास्वपियेस्थिताः तेसर्वे
इत्थंदेवर्षिमनुजांस्तर्पयित्वापितृसंयुतान् दक्षिणाभिस्ततस्तस्यास्तोषयित्वाद्विजोत्तमान् शूर्णंप्रदाप
येत्पश्चाद्दिक्षुकोणेषुबलिंततः इत्थंयः कुरुतेभक्त्याद्वादश्युद्यापनंमुने सप्तजन्मकृतंपापंतत्क्षणादेव
नश्यति इतितर्पणं अथध्यानमा ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसंनिविष्टः
केयूरवान्कनककुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः वैनतेयसमारूढो लक्ष्मीहृ
द्यनंदनः शंखचक्रगदापद्मपाणिर्ध्यायेद्धरोहरिः त्वमेवमाताइतिध्यानमात्पुष्पाणि ॥ इतिपद्मो
द्भवसंहितायांद्वादश्युद्यापनंसमाप्तम् ॥ अथविधिक्रमः अत्रादौग्रहमंडलमुल्लिख्यतद्दक्षिणे
पूर्वोद्दिक्षुदक्षिणतःकलशत्रयोदशान्यमत्रयोदशोपरिसंस्थापयेत् तेषुमध्येप्रतिमांस्थापयेत्
ततोभद्रपाठादिकलशार्चनंपठेत् अथध्यायमित्यादिशन्नोदेवीनावत् ब्रह्मकलशेसंपूज्य अतो

ब्रा० ११

देवाश्रवंतनो २ नहिस्त्रीपरमंपदं २ अतद्विस्तुरितिचतुष्टयं ब्रह्मकलशे ततःपूर्वादिकलशानां
त्रयोदशानांपुरुषसूक्तेनपुष्पाणिक्षिपेत् ततोब्रह्मकलशे अग्नयेनमः वायवेनमः सूर्यायन-
ब्रह्मणेनमः प्रजापतयेनमः कृष्णर्षिभ्योनमः इंद्रायपर्वनाद्यादिसर्वमस्यकंग्रहमंडलेअर्चये
त् ऐंद्राग्नमित्यंतंयथाक्रमं ॥ मधुपर्कंच सावित्राणि गणपतयेकुमाराय चतुर्वेदेश्वरायसांवत्स
राये मासाधिपतित्वंपतये विश्वेवेसांकुचराय सपरिवाराय मार्गशीर्षेरुक्मिणीसहितायकृष्णाय
श्रीसहितायकेशवाय २ पौषेप्रियासहितायअनंताय वागीश्वरीसहितायनारायणाय माघे प्री
तिसहितायअच्युताय कांतासहितायमाधवाय फाल्गुणे शांतिसहितायचक्रिणेक्रियासहि-
तायगोविंदाय चैत्रे सिद्धिसहितायवैकुंठाय शांतिसहितायविष्णवे वैशाखे श्रीसहितायजना
र्दनाय विभूतिसहितायमधुसूदनाय ज्येष्ठेमहिमासहिताय उपेंद्राय इच्छासहितायत्रिविक्रमा
य आषाढेलक्ष्मीसहिताययज्ञपुरुषाय प्रीतिसहितायवामनाय श्रावणे कांतिसहितायवा
सुदेवाय रतिसहितायश्रीधराय भाद्रपदे प्राप्तिसहितायहरये मायासहितायहृषीकेशाय आ
श्वयुजे प्राकाम्यासहिताययोगेश्वराय धीसहितायपद्मनाभाय कार्तिकेलघिमासहिताय सुंदरी
कांताय महिमासहिताय दामोदराय अग्नयेइं इंद्रादिभ्यः अष्टौकुलनागेभ्यः आदित्यादिभ्यः ११
वास्तुष्पतिदेवताभ्यः क्षेत्राधिपतिदेवताभ्यः राकादिभ्यःसमस्तयागदेवताभ्यः दधिमधुपर्कनैवे ११

ध्रुवं विवेक्ष्यामि नमः हिरण्यगर्भ इत्यष्टौ ऋचाः ८ अर्चनं कृत्वा ॥ ततः भद्रपीठोपरि आसनं पुष्पं दत्वा
विष्णुप्रतिमां स्थापयेत् आदौ देहन्यासं षोडशार्चनपुरुषसूक्तेन प्रथमं विन्यसेद्वामे पुरुष दक्षिणे
करे एतावानस्य पादे त्रिपादूर्ध्वं च दक्षिणे तस्माद्विराड्वामजानौ यत्पुरुषं च दक्षिणे तं यज्ञं तु ततः क
ट्यां तस्माद्यज्ञात्तु गुह्यके तस्मादश्वास्तथा नाभौ तस्मादस्वाह हृदि न्यसेत् यत्पुरुषं त्र्यग्रीवायां ब्राह्मणो
वामबाहौ च दक्षिणे चंद्रमा चैव नाभ्या आसीत्तथा मुखे सप्तास्यासंस्तथा नेत्रे शीर्ष्णो मूर्ध्नि यज्ञेन विन्यसेत्
यथा देहे तथा देवे न्यासकर्म समाचरेत् विना न्यासं च यत्कर्म तद्धर्मं हरन्ति राक्षसाः न्यासमूलमिदं स
र्वं तस्मान्न्यासं तु कारयेत् तीर्थस्नेयं वस्त्रोपवि· आत्मपूजां धूपदीपौ संकल्प्य आत्मनःशुएपहृअर्थं
विष्णुप्रीत्यर्थं द्वादशीव्रतोद्यापननिमित्तं धूपो नमः दीपो नमः ततो विष्णुप्रतिमायां जीवदानं अश्वि
नोः प्राण· देवस्य न्यासं ततः पूजां ॐ भूर्भुवः स्वः तत्सवितुः ३ ॐ नमोस्त्वनंताय ३ वासुदेवाय वि·
३ जितंते ३ नमः कारण ३ विश्वरूपा ३ अद्य तावत् गणपतेः कुमारस्य रुक्मिणीसहितस्य ग्रहाल
स्य १२ अग्नेः ६ इन्द्रादीनां १० अष्टोत्रकुलनागदेवतानां आदित्यादीनां ११ वास्तोष्पतिदेवतानां क्षे
त्राधिपतिदेवतानां राकादेवतानां सिनीवाली तथा भूः देवतानां भुवः देवतानां स्वः देवतानां
ॐ भूर्भुवः स्वः देवतानां समस्तब्रह्माण्डदेवतानां द्वादशीव्रतोद्यापनदेवतानां आत्मनःशुएपहृद्य
र्थं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं विष्णुपूजनं कलशपूजनं यागपूजनमर्चामहं करिष्ये

द्वा०उ
२२

ॐ अस्तु एवं मासनादि दक्षिणांतं पूजनं कार्यं ततोग्निकर्म अग्निं परिसमुह्य पर्युक्ष्य परिषिच्य पा
रिस्तीर्य पंचश्रीणि इत्यादि सावित्राणि गणपतये कुमाराय इत्यादि मासाधिपतये विष्णवे तथा
रुक्मिणीसहिताय कृष्णाय ४४ अग्नये वायवे ६ इंद्रादिभ्यो दश १० अष्टौ कुलनागेभ्यः आदित्या
दिभ्यः ११ वास्तोष्पतिदेवताभ्यः चैत्राधिपतिदेवताभ्यः राकादिभ्यः समस्त द्वादशीव्रतोद्यापनदे
वताभ्यः जुष्टं निर्वपामि एवं प्रोक्षणं आज्यभागांतं हुत्वा पर्वतंत्रं ततः कृत्वा पालाशसमिधां प्रात
महोत्तरमतो देवा इत्यादि अतो देवा इति मंत्रेण पालाशसमिधान् जुहुयात् तथा एवं संख्यया त
द्विष्णोरिति मंत्रेण पालाशसमिधान् जुहुयात् तथा एवं संख्यया तद्विष्णोरिति ऋग्द्वयेन दूर्वाङ्ग्यो
हिता जुहुयात् प्रतद्विष्णुरिति तत्संख्यया स्थालीपाकं जुहुयात् अतो देवाः समिधाः १०८ निषुसी
द गणपते इत्यादि ऐंद्राग्नमित्यंतं तद्विष्णोरिति मंत्रद्वयेन दूर्वाहोमः १०८ प्रतद्विष्णुरित्यनेन चरुणाम
ष्टोत्तरशतं १०८ ततः निषुसीद गणपते सर्वं स्वकमंत्रेण जुहुयात् प्रतद्विष्णुरिति आज्येन तु १०८ त
तः आज्येन चरुचकं अनेन मंत्रहोमेन आत्मनः श्रुणकुर्वार्थं यथोक्तफलप्राप्त्यर्थं द्वादशीव्रतोद्यापन
निमित्तं गणपतिः कुमारः श्रीः सरस्वती लक्ष्मीः विश्वकर्मा द्वारदेवताः तथा मासपति विष्णुः इं
द्रादयः दशलोकपालाः अष्टौ कुलनागदेवताः आदित्यादयः एकादश ग्रहाः वास्तोष्पतिदेवताः २२
चैत्राधिपतिदेवताः राकाद्यास्समस्तयागदेवताः द्वादशीव्रतोद्यापनदेवताः ब्रह्मांडस्थदेवताः स

मिथाहोमेवञ्चनूहोमेनआज्यहोमेनश्रीयंतांप्रीताभवंतु ततःआज्येनपुरुषसूक्तहवं लक्ष्मीसूक्तानिहोमा
येत् अनेनमंत्रहोमेनद्वादशीव्रतोद्यापननिमित्तंयथोक्तफलप्राप्त्यर्थंवह्निमूर्तिनारायणःप्रीयतांप्रीता
भवंतु ॥ कूष्मांडाख्याज्येनहोमयेत् ततोयवतिलहोमः इदंहविःशृतमभिघार्य ॐअग्नयेस्वाहा ॐभूः
स्वाहा ॐभूः २ ॐभूर्भुवःस्वः ३ इष्टिन्नमः जनयन्देवएकादशं ततोगायत्रीब्रह्मणेतर्पणंच अध्वर्यो इमा
नोदेवीरित्यनेन तर्पणं इंद्रापर्वताजयेमतावत् तर्पणं अग्निरस्मिवि प्राकृत ऋग्यजुःसूक्तानिब्राह्मणैरनु
तंविचार्यहोमयेत् वास्तोष्पतिसूक्तं क्षेत्राधिपतिसूक्तं रात्रिसूक्तं राकाहोमममित्यादि ऋचकंसमापयेत्
सर्वदेवतसूक्तं यथाक्रमेणसर्वेषामेवपृथक्पृथक्तर्पणंकुर्यात् ततोरुद्रपंचकं देवीपंचकं आज्येनतत
स्तर्पणं यवतिलैःपुरुषसूक्तं ततस्तर्पणं ततःऋततिथ्यादिपर्वितहुतभोइत्यनेन ततोनैवेद्यं सावित्रा
णिगणपतये इत्यादिद्वादशीव्रतोद्यापनदेवताभ्योनैवेद्यंनिवेदयामिनमः ततोद्वादशभागं कूष्मांडा
निसमापयेत् ततःप्रभातेसंप्राप्तेब्राह्मणान्पूजयेद्बहूनिति प्रभातेन्यासकर्माच पूजामात्रंच वैश्वदेवंच
नैवेद्यंच स्नात्वाद्यःब्राह्मणपूजनं ॐभूर्भुवःस्वः ॐनमोस्त्वनंताय प्रायश्चित्तहोमंसंपाद्य पूर्ववत् द्वादशपुष्पा
णिदत्वा तान्कलशान्ब्राह्मणेभ्योदद्यात् ॐसावित्राणियथोक्तफलप्राप्त्यर्थं द्वादशीव्रतोद्यापननि
मित्तं रुक्मिणीसहितायकृष्णाय श्रीसहितायकेशवाय विसर्वेविष्णुकलशांसहिरण्यसवाससमात्र
ददानि प्रतिगृह्णामि एवं ए विष्णुप्रतिमा होमकर्मप्रतिपादयेत् ततःतर्पणं ततोदध्यक्षततिलैःता

द्वा॰ १३

न्मूर्वे लिखितं तत्पीणं कुर्यात् शक्त्या संपाद्य पूर्णं दद्यात् अग्निं विसर्जयेत् अनिरुद्ध ब्रह्मणस्पते ॥ इति द्वा
दशीव्रतोद्यापनं समाप्तम् अथ अनंतोद्यापनम् ॥ ॐ नमो नारायणाय युधिष्ठिर उवाच उद्यापनवि
धिं ब्रूहि व्रतस्यास्य जगत्पते न दृष्टं श्रोतुमिच्छामि व्रतं संपूर्णहेतवे कृष्ण उवाच व्रतं तु सकलं कृत्वा नव
वर्षाणि पंच च यथोक्तेन विधानेन भक्त्या संपूजयेत्ततः ततश्च तु दशे वर्षे व्रते पूर्णे नराधिप आदौ मध्ये
तथांते च अनंतोद्यापने शुभे गोचर्ममात्रं भूलिप्तं च तत्र गोमयैः मंडलं कारयेत्तत्र सर्वतोभद्रसंज्ञकं
पंकजं कारयेन्मध्ये युक्तं कर्णिकया तथा श्वेततंडुलपिष्टेन पंचवर्णेन कारयेत् शोभोपशोभसंयुक्तं परि
प्रज्ञाटकावृकं तन्मध्ये स्थापयेत्कुंभं निव्रणं मृण्मयं तथा माषमेकं तु सुवर्णेन अनंतं कारयेद्व्रती वित्त
शाठ्यं न कर्तव्यं स्वशक्त्या कारयेद्व्रतं पात्रं च कारयेत्पात्रं रजतेनोत्तमेन च अथवा ताम्रपात्रं तु देवं तस्योपरि
न्यसेत् श्वेतवस्त्रपरिच्छन्नं चंद्रातपविच्छित्तिमत् चामरं च तथोसीसं पीतकं चार्घपात्रकं कर्तव्यं विधिवत्ता
स्य देवस्याग्रे विधापयेत् ब्रह्माणं भास्करं शेषं व्योमव्यापिनमीश्वरं विश्वरूपं महाकायं सृष्टिसंहारकार
कं अनंतं वामनं विष्णुं केशवं नृसिंहकं पद्मनाभं तथा पूजयपश्चामास्यमस्तकं ॐ नमो ब्रह्मणे नमः पाद
योः ॐ भास्कराय नमः जंघयोः ॐ शेषाय नमः जान्वोः ॐ व्योमव्यापिने नमः ऊर्वोः ॐ ईशानाय नमः कट्यां
विश्वरूपाय नमः नाभौ महाकालाय नमः उदरे सृष्टिसंहारकाय नमः वक्षसि अनंताय नमः स्कंधयोः
वामनाय नमः वक्त्रे ॐ विष्णवे नमः नासायां केशवाय नमः नेत्रयोः नरसिंहाय नमः ललाटे पद्मनाभाय रा

नमः शिरसि ॥ पादौजंघेतथाजानूऊरूनाभिंतथोदरं वक्षःस्कंधौचवक्त्रंचनासानेत्रेतथैवच ललाटंशिरः
संस्थेवक्त्रब्रह्मणःपद्मनाभकं पूजयेत्विधिनानेनमंडलेपूजयेदमी कलशेषुविधानेनानेनन्यासस्यदेवताः
इतिन्यासः प्रथममंडलपूजनं ॐविराजायनमः ॐब्रह्मणेनमः ॐप्रभवेनमः ॐकुमारायनमः ॐनारदाय
नमः ॐमरीचयेनमः ॐआत्रेयायनमः ॐकपिलायनमः ॐव्यासायनमः ॐयज्ञायनमः ॐधान्वंतरयेनमः
ऋषिभ्योनमः नारायणायनमः ॐवृषस्कंदायनमः ॥ ॐमोहिनीसहितायअनंतायनमः श्रीसहितायअन
घायनमः पद्मिनीसहितायरुक्मिणीकांतायनमः ॐमहाधनासहितायगरुडध्वजायनमः ॐअजयासहिता
यकूर्मायनमः ॐमंगलासहितायश्रीधरायनमः ॐवरदासहितायनरसिंहायनमः ॐशुभासहिता
यउपेंद्रायनमः शिवदूत्यासहितायनामदंष्ट्रायनमः ॐदुर्गासहितायरघुनंदनायनमः ब्राह्मणीसहि
तायकृष्णायनमः ॐचित्रमंडलासहितायरुद्ररूपायनमः ॐरेवतीसहितायकल्किनेनमः ॐहरसिद्धास
हितायमधुसूदनायनमः इतिचतुर्दशानंतमंत्रः ॥ नमित्रस्यवरुणस्याभिचक्षेसूर्यरूपंश्रुणुएतेघोर
पस्यौ अनंतमन्यद्रुषदस्यपाजः कृष्णमन्यद्धरितासंभरंति यस्मानंतोभूदेवस्वेष्टार्थसिद्धिर्वाआमस
इतिरोरुवत् ततःप्रणामः श्लोकाः अनंतंकामदंदेवंपुत्रपौत्रप्रवर्धकं सूत्रग्रंथोरकेविलसर्वकामफलप्र
दं अच्युतानंदगोविंदवैकुंठगरुडध्वज विलोपीनांबरधरसदानंतनमोस्तुते शंखतोयसमादायसपुष्प
फलचंदनं जानुभ्यामवनिंगत्वानंतेनांतरात्मना ईप्सितंदेहिमेकामंपुत्रानर्थंचवांछितं संतुष्टोदेहि

अ.न मेदेवभगवन्भक्तिवत्सल नमोथ्यातोर्चितोनित्यंभुक्तिमुक्तिप्रदोभव कर्मणामनसावाचायौवनेवा
उ. र्धकेपिवा यन्मयोपार्जितंपापंतत्सर्वंहरमेहरे ॥ यच्चिंतितंचमनसावचसायदुक्तंचक्षुःकरश्रवणपा
२४ दविचेष्टितंच यद्यन्निषण्णस्त्वदिवसेषुकृतंमयैवतत्तज्जनार्दनतवार्चनमेवभूयात् अपराधसहस्रसंकुलं
पतितंभीमभवार्णवोदरे अगतिंशरणागतंहरेकृपयाकेवलमात्मसात्कुरु ॥ अनंतगुणसंपूर्ण
सर्वकामफलप्रदः अनंतडोररूपेणपुत्रपौत्रप्रवर्धकः अनंतत्रिजगद्धामविश्वरूपधराच्युत नमोमहा
त्मभूतायह्यनंतायनमोनमः आवाहयाम्यमरवंद्यतांत्रिगुणंलक्ष्मीपतिंभुवनकारणमप्रमेयं आ
द्यंसनातनमनंतमनुप्रणवासनस्थंपूर्णेंदुभास्करसहस्रनाभमहसस्वरूपं ध्येयंपरंसकलतत्वविदांचवेद्यंवासा
रूकापिलनवोसमसौम्यमूर्तिं श्रीवत्सकौस्तुभमहामणिभूषितांगंकौमोदकीकमलकंबुरथांग
हस्तं त्वंसर्वगोसिभगवान्किलयद्यपित्वामावाहयामिहितथाप्यननेनवायुः शुद्धोयथैवदहनोमथ
नादुपैतिहात्वावाहयामिहितथात्वमुपैतिचर्चा मालाधराच्युतविभोपरमात्ममूर्तेसर्वज्ञनाथपरमेश्व
रसर्वशक्ते आगच्छमेकुरुदयांप्रतिमांभजस्वपूजांगृहाणमदनुग्रहकाम्यया ॥ अथैवमूर्ध्वेचेतन्या
हन्यायायैकनामयो तोदेवेशजगद्योनेनमस्तगरुडध्वज अनंतजगदाधारविश्वरूपधरायच महात्म
नेहरयेशायनमोनारायणायच इतिन्यासमुद्रा ॥ अथानंतपूजनंलिख्यते ॥ प्रथमंस्थंडिलमुपलि
प्यमंडलमुपलिप्य ततभद्रपीठकलशपूजांविधाय तत्रपूर्णकलशोपरिपिठित्वा आत्मपूजांकृत्वा २४

अनंतादीनां चतुर्दशानां देवतानामर्चनं कुर्यात् ततः गायत्रीभिः जितंते पुंडरीकाक्ष इति च ॐ नमोस्त्वनंताय इति
च अनंतगुणरत्नाय विश्वरूपधराय च महात्मने सहस्रशीर्षाय नमो नारायणाय च ॥ अथ तावत्तिथावद्य भाद्रप
दमासस्य शुक्लपक्षस्य तिथौ चतुर्दश्यां गणपतेः प्रजापतेः ब्रह्मणः कलशादेवतानां ब्रह्माविष्णुमहेश
देवतानां चतुर्वेदस्वरस्य सप्तसमुद्रस्य मायासहितस्य हृषीकेशस्य अनंतादीनां शक्तिसहितानां चतुर्द
शनारायणानां विराजादीनां चतुर्दशग्रंथिदेवतानां आत्मनः शुभफलप्राप्त्यर्थं अशेषपापक्षयार्थं अनंतो
द्यापननिमित्तं कलशपूजनं अर्चामहं करिष्ये ॐ अरुष्य अनंतगुणाः यवान्विकीर्य ब्रह्मणः कलशादेवता
नां अनंतादीनां शक्तिसहितानां चतुर्दशनारायणानां विराजादीनां चतुर्दशग्रंथिदेवतानां मायासहि
तस्य हृषीकेशस्य इदमासनं नमः ततो ध्यायेत् अनंतो द्वादशनाथ त्वं महानर्णवान् त्रैलोक्यव्याप
कानंत पाहि मां भवसागरात् ब्रह्मणे कलशादेवताभ्यो युष्मान् त्वः पूजयामि ॐ पूजय एता देवताः आवा
हयिष्यामि ॐ आवाहय ततः आवाहनं युंजते मन आगच्छानंत देवेश तेजोराशे जगत्पते गृहाणार्चाम
यादत्तं सदानंत नमोस्तु ते ततः शन्नोदेवी हिरण्यवर्णा इति च तस्य पाद्यं शन्नोदेवी आपो हि ष्ठेति अर्घ्यं
शन्न आप इति आचमनीयं इदमाप इति मंत्रस्नानं अंबुनाय यस्मात् धाम्नो तेन मधुना यवैः शर्करासर्षपति
लैः तथा चामीकरेणैव कर्पूरकुंकुमाभ्यां चलाजाक्षतैः सगुग्गुलैः सर्वौषधीस्तथा पंचामृतस्नानानि
षोडश सर्वौषधिसमायुक्तैर्गंधरत्नादिसंयुतैः सर्वतीर्थहृतैः तोयैः स्नानं मे प्रतिगृह्यतां इति स्नानमंत्रः
विश्वेदेवाः नमो ब्रह्मणे इति देवतर्पणं उशंतस्त्वा इति पितृतर्पणं तद्विष्णोः तद्विप्रासः ॐ अनंताय नमः इति मंत्रस्नानं

अ॰त
उ॰
२५

प्रत्यग्रेहस्मैत्पारात्रिकं ध्रुवाद्यौः इत्यासनं अनंतोद्धमं नाथेति स्थंडिले स्थापनमंत्रः रत्नेश्वरोपेत्य
नुलेपनं ॐ कुंकुमागुरुकर्पूरमृगनाभिसमन्वितं श्रीखंडचंदनं विलोप्रीत्यर्थं प्रतिगृह्यतां इति चंदनम
न्त्रः अनंतादिभ्यः समालभनं गंधो नमः यो वासो वासः यज्ञोपवीतं परमं पवित्रं होमजं वा यज्ञकार्यसं
न्तथा सो वर्णमिवखा ब्रह्मसूत्रं सोमरीय गृह्याणपुरुषो नमः यज्ञोपवीतं नमः आप्यायस्वेत्यर्घ्यो पुष्पव
तीति पुष्पं मल्लिकामालतीजातीकितकीचंपकस्रजं गृहाणानंत महत्त्वांसदानंत नमोस्तुते धूरसि वन
स्पतिरसो धूपो नमः तेजोसि अनंतज्योतिरेकस्त्वं जगतां मधुसूदन रविविद्युच्छिखाप्रख्यो दीपोयं प्रति
गृह्यतां दीपो नमः अर्घ्यदानाद्यर्चनविधिस्सर्वः परिपूर्णः अस्तु अन्नं नमः इदं विष्णु प्रस्थेन तंडुलानां
चगोधूमानामथापि वा खंडेन सर्पिषा युक्तं नैवेद्यं प्रतिगृह्यतां अनंतादिभ्यः नैवेद्यं निवेदयामि नमः
अद्य यथा सर्वमच्छिद्रमस्तु एवमस्तु अनंतादिभ्यः आपोशानं नमः अपहता असुरा अन्नं तं भुंजीत आच
मनीयं नमः दक्षिणा येति लक्ष्मीरूपं सजन निष्क्रमणं नमः अनंतादयः शक्तिसहिताः प्रीयंतां प्रीता
भवंतु पूर्ववत्कलशं संपाद्य अद्यतावत् अच्छिद्रं संपूर्णमस्तु अनंतादिभ्यो यवोदकं नमः तथैव विसर्जनं कु
र्यात् अनंतकामदं देवं एवं श्लोकान् पठिष्यति पूर्वे लिखितान् पुनः कर्णे वा बाहौ वा धारितं स्यात् पूजां
कुर्यात् यथा मोहिनी सहिताय अनंताय नमः एवं सर्वत्र आवाहयाम्यहं मधुसूदन इति प्रणामं कृत्वा ।
भोजनं कुर्यात् कथां शृणुयात् ॥ इति भविष्यत्पुराणे अनंतव्रतोद्यापनं समाप्तम् ॥ अथ जन्माष्टमी २५

व्रतोद्यापनं ॥ युधिष्ठिर उवाच ॥ जन्माष्टमीव्रतं ब्रूहि विस्तरेण ममाच्युत ॥ कुतः कालात्समुत्पन्नं किं पुण्यं को
विधिः स्मृतः ॥ श्रीकृष्ण उवाच ॥ हते कंसे सानुगे युद्धे मथुरायां युधिष्ठिर ॥ देवकी मां परिष्वज्य कृत्वोत्सङ्गे रुरोद ह ॥
तत्र वै रङ्गवाटे सा मम मूर्ध्नि जनोत्सवे ॥ मल्लयुद्धे पुरा हत्वा सहन्तं जङ्कारं धके स्वजने बन्धुभिः स्त्रियस्तेषां स्त्रीभिः
समाहूता वसुदेवोऽपि तत्रैव वात्सल्यात्करोदह ॥ समालिङ्ग्य परिष्वज्य पुत्रपुत्रेति [illegible] सगद्गदस्वरो दी
नोऽहं दिवा च कृष्णकृष्णेति ॥ बलभद्रं च मां चैव परिष्वज्य मुदान्वितः ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितं ॥ य
द्युताभ्यां पुत्राभ्यां मे समुद्भूतः समागमः ॥ एवं हर्षेण दम्पत्योर्हृष्टं दृष्ट्वा तदाभवत् ॥ प्रणिपत्य जनः सर्वे मामु
वाच ते प्रहर्षिताः ॥ अद्य प्रहर्षितोऽस्माकं मघजातो जनार्दनः ॥ अद्य मल्लाश्च युद्धेन दुष्टः कंसो निपातितः ॥ एवं म
होत्सवं दृष्ट्वा तं सर्वं मधुसूदन ॥ प्रसादः क्रियतामस्य लोकस्याद्य पुनोऽव्रतं ॥ यस्मिन्दिने प्रसूतेयं देवकी त्वं
जनार्दन ॥ तद्दिनं ब्रूहि वैकुण्ठ कुर्मो वर्धापनं तव ॥ सम्यग्भक्तप्रपन्नानां प्रसादं कुरु केशव ॥ एवमुक्तेन नोद्य
न वसुदेवोऽपि विस्मितः ॥ विलोक्य बलभद्रं च मां प्रहृष्टतनूरुहः ॥ एवमस्त्विति लोकानां कथयस्व यथातथा ॥
ततः तेषां समादेशान्मया जन्माष्टमीव्रतं ॥ मथुरायां जनौघाय यथार्थं सम्यक्प्रकाशितं ॥ अज्ञातं जन्म दि
नं वर्षे गर्भाष्टमे गते ॥ पुनर्जन्माष्टमी लोकाः कुर्वन्तु ब्राह्मणा जनाः ॥ क्षत्रिया वैश्यजातीयाः शूद्रा येऽन्ये च धा
र्मिकाः ॥ सिंहराशिगते सूर्ये गगने जलदाकुले ॥ मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्धरात्रिके ॥ शशाङ्के वृषरा
शिस्थे नक्षत्रे रोहिणीयुते ॥ वसुदेवेन देवक्यामहं जातो जनार्दनः ॥ एवमेतत्समाख्यातं लोके जन्माष्टमी

ज.ष्ट.
उ.
२६

दिनं भगवत्याश्च तत्रैव कंसध्वंसमहोत्सवं मथुरायां ततः पश्चाल्लोके ख्यातिं गमिष्यति । शांतिरस्तु शिवं
चास्तु लोकाः सन्तु निरामयाः । युधिष्ठिर उवाच । तत्कीदृशं व्रतं देवलोके समर्वैरनुष्ठितं जन्माष्टमीव्रतं ना-
म पवित्रं पुरुषोत्तम येन त्वं तुष्टिमाप्नोषि लोकानां प्रभुरव्ययः एतन्मे भगवन्ब्रूहि प्रसादान्मधुसूदन ॥
कृष्ण उवाच पार्थिव तद्दिने प्राप्ते दंतधावनपूर्वकं एकेनैवोपवासेन कृतेन कुरुनंदन सप्तजन्मार्जितं पा-
पं नश्यते नात्र संशयः । उपावृत्तस्तु पापेभ्यो यस्तु वासो गुणैः सह उपवासः स विज्ञेयः सर्वभोगविवर्जितः
ततः स्नात्वा तु मध्याह्ने नद्यादौ विमले जले देव्याः सुशोभनं कुर्याद्देवक्याः सूतिकागृहं पद्मरागैश्च पट्टी-
नेत्रैः पिंडितं चर्चितं तथा रम्यं चंदनमालाभिर्मुक्तामणिविभूषितं सर्वगोकुलवत्कार्यं गोपीजनसमाकु-
लं घंटामर्दलसंयुक्तं मंगल्यपल्लवान्वितं प्रांगणे स्वस्तिकयुग्मं सर्ववादित्रसंकुलं द्वारविन्यस्तकुशलं
रक्षितं रजपालकैः षष्ठीदेव्याश्च संयुक्तं नैवेद्यैर्विविधैस्तथा एवमादि यथाशक्त्या कर्तव्यं सूतिकागृहं त-
न्मध्ये प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता कांचनी राजती ताम्री पैत्तली मृण्मयी तथा दारवी मणिमयी
चैव वर्णिका लिपिका तथा सर्वलक्षणसंपूर्णा पर्यंके चार्धशायिके प्रतप्तकांचनाभासा मयासहतपस्वि-
नी प्रसूतमात्रा च प्रसूता च तत्क्षणात्प्रहर्षिता मां चापि बालकं तत्र संपर्यंके स्तनपायिनं श्रीवत्सवक्षसं पूर्ण-
नीलोत्पलदलच्छवी यशोदा चापि तत्रैव प्रसूता चैव कन्यका: तत्र देवाश्च हा नागा यक्षाश्च विद्याधरा नराः
प्रणताः पुष्पमालाग्रव्यग्रहस्तास्तथाऽमराः संचरंतस्तु वाकाशे प्राकारे स्फटिकादिभिः वसुदेवोपि तत्रैव खड्ग- २६

चर्मधरस्थितः कश्यपो वसुदेवोपि अदितिश्चापि देवकी शेषो नागो हली वात्र यशोदादित्यजावसा नंदः प्र
जापतिर्दक्षो गर्गश्चापि चतुर्मुखः यशोवतारो राजेंद्र कंसोजनन निपातितः नत्र कंसनियुक्ता ये दानवा विविधा
युधाः ते च पार्श्वे हरिकाः सर्वे घूर्मानिद्राविमोहिताः गोधनं कुंजरोष्ट्राश्च दानवा शस्त्रपाणयः नृत्यं त्वप्सरसो ह
ष्ट्या गंधर्वा गीततत्पराः लेखनीयाश्च तत्रैव कालीयो यमुनाह्रदे यशोदाशयने तत्सा बालकं च प्रसूतिका कृष्णा
मेवंविधो कृत्वा देवकीं न प्रसूतिका नानार्थ पूजयेद्भक्त्या गंधपुष्पाक्षतैः फलैः कूष्मांडैर्नारिकेलैश्च खर्जूरैः
र्दाडिमीफलैः बीजापूरैः पूगफलैर्लड्डुकैः स्त्रपुसैस्तथा कालदेशोद्भवैर्दिष्टैः पुष्पैश्चापि युधिष्ठिर ध्यात्वाव
तारं यतेन मंत्रेणानेन पूजयेत् गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः भृंगारादर्शकुंभप्रवरकृत।
कौर्विन्नैः सेव्यमाना पर्यंके स्वास्तृते सा मुदिततनुमना पुत्रिणी सम्यगास्ते सा देवी देवमाता जय सुभवदना
देवकी कांतरूपा यामादावभ्यंगयंती श्रीर्देवकन्यावरणांतिके निषण्णा पर्यंके सुप्तानु मोदिन्वे श्रियेतिच कृष्णा
यनमः वासुदेवाय नमः ॐ देवक्यै नमः ॐ देव्यै नमः बलभद्राय ॐ वरुणाय नमः ॐ नर्मदायै नमः ॐ यशोदा
यैनमः इत्येवमादिनामाभिस्त्वार्य पूजयेत्पृथक् पूजयेयुर्द्विजाः सर्वे स्त्रीशूद्रा मंत्रवर्जितं श्रद्धाविधानतो
किंचिद्भ्रांतितत्र द्विजोत्तमाः चंद्रोदये शशांकाय चार्घ्यं दद्याद्धरिं स्मरन् अनर्घं वामनं शौरिं वैकुंठं पुरु
षोत्तमं वासुदेवं हृषीकेशं माधवं मधुसूदनं दामोदरं पद्मनाभं केशवं गरुडध्वजं गोविंदमच्युतं कृष्णमन
न्तमपराजितं अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारकं अनादिनिधनं देवं त्रैलोक्येशं त्रिविक्रमं नारायणं

ज०सू
उ०
२

चतुर्बाहुं शंखचक्रगदाधरं पीतांबरधरं नित्यं वनमालाविभूषितं श्रीवत्सांकं जगन्नाथं श्रीधरं श्रीपतिं ह
रिं ॥ योगेश्वराय योगसंभवाय योगाधिपतये गोविंदाय नमः स्नानमंत्रः ॐ यज्ञेश्वराय यज्ञसंभवाय यज्ञा
धिपतये गोविंदाय नमः अर्घार्चनमंत्रः ॐ विश्वेश्वराय विश्वसंभवाय विश्वाधिपतये गोविंदाय नमः नैवे
द्यमंत्रः ॐ धर्मेश्वराय धर्मसंभवाय धर्माधिपतये गोविंदाय नमः शयनमंत्रः क्षीरोदार्णवसंभूत ह्यत्रिने
त्रसमुद्भव गृहाणार्घं शशांकेदं रोहिण्या सहितो मम स्थंडिले स्थापयेद्देवीं सचंद्रां रोहिणीं तथा देवकीं
वसुदेवं च यशोदां नंदमेव च बलभद्रं च संपूज्य सर्वपापैः प्रमुच्यते अर्धरात्रे वसोर्धारां पयसा गुडसर्पिषा
ततो वर्द्धापयेत् षष्ठीनामादिकं मम कर्तव्यं तल्लक्षणाद्रात्रौ प्रभाते नवमीदिने यथा मम कृतं तथा कार्यं
भगवत्या महोत्सवं ब्राह्मणान्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणां हिरण्यकांचनं गावो वासांसि कुसुमा
नि च यद्यदिष्टतमं तत्तत्कृष्णो मे प्रीयतामिति यं देवं देवकी देवी वासुदेवमजीजनत् धर्मगोप्त्रे च भूमौ वत
त्सेषु सर्वात्मने नमः एवं यः कुरुते देव्या देवक्याश्च महोत्सवं वर्षे वर्षे भगवतो मद्भक्त्या धर्मनंदन नरो वा यदि
वा नारी यथोक्तफलमाप्नुयात् पुत्रसंतानमारोग्यं धनधान्यविवर्धनं शालीक्षुयवसंपूर्णं मंडलं सुमनोहरं
तस्मिन्राज्ये प्रभुंजीत दीर्घायुर्धनमीप्सितं परचक्रभयं नास्ति तस्मिन्राष्ट्रेऽपि पांडव पर्जन्यः कामवर्षी स्यादीतिभ्यो
न भयं भवेत् जन्माष्टमी जनमनोनयनाभिरामा तां पापहां सपदि नंदितनंदगोपां यो देवकीसदयितां यजतीह
नरः स पुत्रानवाप्य समुपैति पदं सविष्णोः ॥ इति भविष्योत्तरपुराणे जन्माष्टमीव्रतं अथ जन्माष्टमीव्रतविधिः २

तत्रादौ षोडशार्चस्य पुरुषसूक्तस्य न्यासविधिः ऋग्विधाने वक्ष्ये पुरुषसूक्तस्य विधानं नर्चनं प्रति अग्निकार्यं
जपविधिस्त्रोत्रं चैव तदात्मकं आदौ पुरुषसूक्तेन न्यासः देहे देवे च एवं न्यासविधिं कृत्वा पश्चाद्धोमं समाच
रेत् होमं समाचरेद्विष्णुपलक्षणं न समाजपेपूजाहोमे वा यमेव न्यासप्रकारः एवं न्यासविधिं कृत्वा पंचांगा
नि समाचरेत् ब्रह्मणोसीत्यादिना च ऋग्भिः पंचकल्पना ब्रह्मणोस्य मुखमासीदित्याद्या ऋच पंच ऋचः पंचान्या
सेयाह्याः आश्वलायनशाखापाठक्रमयुक्ताः हृदयशिरःशिखाकवचास्त्रमंत्राश्चेति पंचांगानि ब्रा
ह्मणोस्य मुखमासीदित्यृचं पठित्वा हृदयाय नमः चंद्रमा मनसो जातश्शिरसे स्वाहा नाभ्यासीदन्तरिक्षमिति प
ठित्वा शिखायै वषट् सप्तास्यासन्निति कवचाय हुं यज्ञेन यज्ञमिति अस्त्राय फट् एवं न्यासद्वयं संकल्पानंतरं क
र्तव्यं आद्यया वाहयेद्देवमृचा तु पुरुषोत्तमं द्वितीययासनं दद्यात्पाद्यं चैव तृतीयया चतुर्थ्यार्घ्यं प्रदातव्यं पंच
म्याचमनं तथा षष्ठ्या स्नानं प्रकुर्वीत सप्तम्यां वस्त्रमेव च अष्टम्यां ह्युपवीतं च नवम्यालंभनं तथा दशम्यां ग
न्धदानं च एकादश्या च माल्यकं द्वादश्या धूपदानं च त्रयोदश्या च दीपकं चतुर्दश्या च नैवेद्यं पंचदश्या तथा
ञ्जलिं उद्वासने षोडश्या सोपचारास्तु षोडश स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकं दद्यात्पुरुषसूक्तेन
यः पुष्पाण्यप एव वा अर्चितं तेन वै सर्वं त्रैलोक्यं सचराचरं दक्षिणं तु यथाशक्त्या षोडशेन प्रदापयेत् पू
जादिकर्मणि दक्षिणा दीयते नाः षोडशेन यज्ञेन यज्ञमयजन्त इत्यनेन मंत्रेण दद्यात् ततः प्रदक्षिणं कृत्वा जपं
कुर्यात्समाहितः यथाशक्ति जपित्वा च सूक्तं चास्मै निवेदयेत् देवस्य दक्षिणे पार्श्वे कुंडं स्थंडिलमेव वा का

ज॰ स्तु॰ द्येन प्रथमार्घं विप्रो दत्त्वा च द्वितीयया तृतीययाग्निमाहूय चतुर्थ्या तु समिंधनं पंचम्यान्वाज्यसंस्कारं षष्ठ्या चरो
३॰ श्रपणं तथा सप्तम्या नलस्य मध्ये तु कल्पयेत्पद्ममासनं चिंतयेत्तत्र देवेशं कालानलसमप्रभं विवृतास्यं ब
८ हुग्रीवं रक्तास्यं रक्तलोचनं एवं देवमनुध्यात्वा समस्तादिच पंचभिर्हविभिर्गंधाद्यैर्नैवेद्यांतैः पंचोपचारैर्देव
स्याहुत्या कुर्यादित्यादि ततो गंधं च पुष्पं च धूपदीपनिवेदनं अनुज्ञाप्य ततः कुर्यात्सम्यक्पाद्यं यथाक्रमं
समिधश्चरुं चैव पूर्वं तु जुहुयादभिघारितः ततो घृतेन जुहुयाच्चरुणा च ततः पुनः एवं हुत्वा ततस्तस्य समीपे स्तो
त्रमुच्चरेत् ॥ ॐ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन नमस्तेस्तु हृषीकेश महापुरुष पूर्वज ॥ नमो हिर
ण्यगर्भाय प्रधानाव्यक्तरूपिणे ॐ नमो वासुदेवाय शुद्धज्ञानस्वभाविने देवानां दानवानां च सामान्यमधि
दैवतं सर्वदा चरणद्वंद्वं व्रजामि शरणं तथा एकस्त्वमसि लोकस्य स्रष्टा संहारकारकः अध्यक्षश्चानुमंता
च गुणमायासमावृतः संसारसागरं घोरमनंतं क्लेशभाजनं त्वामेव शरणं प्राप्य निस्तरंति मनीषिणः न
ते रूपं न चाकारमायुधानि न चास्पदं तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे नैव किंचित्परोक्षं ते प्रत्यक्षो
सि न कस्यचित् नैव किंचिदसिद्धं ते न च सिद्धोसि कस्यचित् कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमं योगि
नां परमो सारो वदंति मुनिसत्तमाः अहं भीतोस्मि देवेश संसारेस्मिन्भयावहे पाहि मां पुंडरीकाक्ष न जानामि श
रणं परं कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत शरीरे प्रयतो वापि वर्धते मम हृद्भयं त्वत्पादकमलादन्यन्न
मे जन्मांतरेष्वपि निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिं विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानवर्जितं जन्मांतरे २२

यिमि देवमाभूदस्य परिग्रहः दुर्गनाव यिजा मायां त्वं गतिस्त्वं मतिर्मम यद्दिनार्थं च निर्दिष्टं भवनास्मि कृतीसदा अका
मकलुषचित्तेन मम तेयाद्द्योस्त्विय तत् कामये देव लब्धं च सर्वं जन्मसु केशवं इत्येवं मनसा भक्त्या स्तुत्वा देवं दिने दि
ने किं करोम्मीति च्यात्मानं देवाय वै निवेदयेत् ॥ इति जन्माष्टमीव्रतविधिः अथात्र तंत्रं लिख्यते ॥ अष्टमंडलम्
लिख्या ततः भद्रपाठादि पात्रोदि वीचित्यं तत्र कल्पं ततः पुरुषसूक्तेन कलशस्य पुष्पाणि प्रक्षिप्य अग्न्येनमः
वायव्येनमः सूर्यायनमः ब्रह्मणेनमः प्रजापतयेनमः ऋष्यादिभ्योनमः इंद्रापर्वतायाः समर्चयेत् पैड्रामंत्र ।
मधुपर्कं च निवेदयेत् ततः पुरुषसूक्तेन न्यासं कुर्यात् ततः ब्राह्मणोस्य मुखमासीदित्यादि पंचर्चेन पंचांगन्या
सं कुर्यात् तीर्थस्नेयं वसोः पवित्रमसि आत्मपूजा कार्या धूपदीपौ संकल्प्य ध्रुवाद्यौरित्यासनं पुष्पं दत्वा भद्र
पीठे विष्णुप्रतिमां स्थापयेत् अस्मिन्नो प्राणा इति जीवादानं दत्वा न्यासकर्म कुर्यात् देहवद्देवस्य न्यासद्वयं कुर्या
त् ततः इष्ट्वा ॐ भूः पुरुषमावाहयामि ॐ भुवः पुरुषमावाहयामि ॐ स्वः पुरुषमावाहयामि ॐ भूर्भुवः स्वः पु
रुषमावाहयामि ॐ भूर्भुवः स्वः तत्सवितुरिति ३ नमोस्त्वनंताय सहस्रमूर्तये इति ३ ॐ वासुदेवाय विद्महे ना
रायणाय धीमहि तन्नो विष्णुः प्रचोदयात् ३ ॐ जितं ते पुंडरीकाक्ष इति ३ ॐ नमः कारणवामनाय गोब्राह्म
णहिताय च जगद्धिताय कृष्णाय गोविंदाय नमो नमः ३ ॐ विश्वरूपाय विद्महे विश्वज्ञानाय धीमहि तन्नो वि
ष्णुः प्रचोदयात् ३ ॐ कृष्णाय वासुदेवाय देवकीनंदनाय च नंदगोपकुमाराय गोविंदाय नमो नमः ३ अथ ता
वत् भाद्रपदमासस्य कृष्णपक्षस्य तिथावष्टम्यां भगवतः आमिषसहितस्य हरेर्मायासहितस्य [illegible]किशोरस्य ।

ज॰न्मा
उ॰
१९

वासुदेवस्य संकर्षणस्य प्रद्युम्नस्य अनिरुद्धस्य मत्स्यस्य पुरुषस्य अच्युतस्य माधवस्य कृष्णस्य वासुदेवस्य देव
क्याः देव्याः बलभद्रस्य वरुणस्य नर्मदायाः यशोदायाः रोहिण्याः चंद्रमसः तथा गणपतेः कुमारस्य श्रियः
सरस्वत्याः लक्ष्म्याः विश्वकर्मणः द्वारदेवतानां प्रजापतेर्ब्रह्मणः कलशदेवतानां ब्रह्माविष्णुमहेश्वराणां च
नवदिक्पालस्य सात्वतस्य अग्नेः वा स्व व म कृ इंद्रादीनामनंतादीनामादित्यादीनां समस्तजन्माष्टमीव्र
तोद्यापनयागदेवतानां आत्मनः यथोक्तफलप्राप्त्यर्थं जन्माष्टमीव्रतोद्यापननिमित्तं विष्णुपूजनं कलशपू
जनं यागपूजनमर्चामहं करिष्ये ॐ रुद्र यवान्विकीर्य सहस्रशीर्षा पुरुषएवेदं ध्रुवाद्यौरित्यासनं पुरु
षएवेदं सर्वं यद्भूतं यच्च भव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति ध्रुवाद्यौर्ध्रुवापृथिवी ध्रुवासः पर्वता इ
मे ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि भगवन् आमिससहितस्य हरेर्भार्यासहितस्य हृषीकेशस्य वासु
देवस्य संकर्षणस्य कृष्णस्य वासुदेवस्य इदमासनं नमः गणपतेः कुमारस्येदमासनं नमः श्रियः सरस्वत्याः
लक्ष्म्याः विश्वकर्मणः द्वारदेवतानां प्रजापतेर्ब्रह्मणः कलशदेवतानां ब्रह्माविष्णुमहेश्वराणां च नवदिक्पालस्य
सात्वतस्य कृष्णस्य वासुदेवस्य देवक्याः देव्याः बलभद्रस्य वरुणस्य नर्मदायाः यशोदायाः चंद्रमसः रोहि
ण्याः इदमासनं नमः अग्नेः ६ इंद्रादीनां समस्तयागदेवतानामिदमासनं नमः एताभ्यो देवताभ्यो युष्मा
न्वः पूजयामि ॐ पूजय सहस्रशीर्षा युंजतेमनइत्यावाहनं ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्
स भूमिं विश्वतो स्पृत्वात्यतिष्ठद्दशांगुलं ॐ युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः वि हो १९

19

ग्राद्दधिवयुनाविदेकस्म्महीदेवस्यसवितुःपरिष्टुतिः देवश्रुतौदेवेष्वाघोषेथां इदंविष्णुर्विचक्रमेत्रेधानिद
धेपदंसमूढमस्यपांसुरे इडावतीधेनुमतीहिभूतंसूयवसिनीमानुषेयशस्ये व्यस्कभ्नारोदसी विष्णुरेते दाध
र्थपृथिवीमभितोमयूखैः वैष्णवमसि विष्णोस्त्वोत्नप्त्रात ॥ दिवोवाविष्णउतवापृथिव्यामहोवाविष्णउरु
तरिक्षत् हस्तौपृणस्वबहुभिर्वासव्यैराप्रयच्छदक्षिणादोतसव्यात् विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थि
वानिविममेरजांसियोअस्कभायदुत्तरंसधस्थंविचक्रमाणस्त्रेधोरुगायः विष्णोःपृष्ठमसि विष्णोररराटमसि वि
ष्णोःश्नप्त्रेस्थो विष्णोःस्योरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवेत्वा प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरोगिरि
ष्ठः यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियन्तिभुवनानिविश्वा विष्णुसानुचरंप्रागांसहितंहरिंमायासहितंहृषी
केशं हुसंवासुदेवं देवकीदेवी बलभद्रं वरुणं नर्मदांयशोदां चंद्रंरोहिणीं तथागणपति कुमारमित्यादि
आवाहयिष्यामि ॐआवाहय यवान्विकीर्य आवाहयाम्यमरेन्द्रनार्थ्यं त्रिभुवनेशंलक्ष्मीपतिंभुवनकारणम
प्रमेयं आद्यंसनातनंप्रणवास्यनस्थंपूर्णेन्दुभास्कररुद्रतासमस्तरूपं ध्येयंपरंसकलतत्त्वविदं वरेण्यंवारा
हकापिलनृकेसरिसौम्यमूर्तिं श्रीवत्सकौस्तुभमहामणिभूषितांगं कौमोदकीकमलकंबुरथांगहस्तं त्वंस
र्वगोसि भगवन्किलयद्यपित्वामावाहयामिहियथाव्यजनेनवायुं मूर्छायथैवदहनोमथनाद्यथैतिह्यावाहितो
सित्वमुपेषितथैवचर्चां मालाधराच्युतविभोपरमात्ममूर्तेसर्वज्ञनाथपरमेश्वरसर्वशक्तिः आगच्छमेकरुणया
प्रतिमांभजस्वपूजांगृहाणमदनुग्रहकाम्ययाद्य ॥ भगवन्पुंडरीकाक्षलोकानुग्रहकारक असमह्यानुरोधेन स

ज॰ष्ट॰ त्रिधानं ऊरुष्टमी ३ ततः प्राणायामं शन्नोदेवीः लाजाश्च भगवंतः पाद्यं १ एतावानस्य महिमातो ज्यायांश्च
उ॰ पूरुषः पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्वि
२० न्द्रः या अग्निं गर्भं दधिरे विरूपास्तान आपः शंस्योना भवंतु यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति
या अग्निं गर्भं यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानां या अग्निं गर्भं शिवेन मा चक्षुषा पश्यताप
शिवया तन्वोप स्पृशत त्वचं मे मधुश्चुतश्शुचयो याः पावकाः तान आपः शंस्योना भवंतु भगवते श्रामिस॰
हिताय हरये मायासहिताय हृषीकेशाय कृष्णाय वासुदेवाय देवक्यै देव्यै बलभद्राय वरुणाय नर्मदायै य
शोदायै चंद्रमसे रोहिण्यै पाद्यं नमः गणपतये पाद्यं नमः कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार
देवताभ्यः पाद्यं प्रजापतये ब्रह्मणे कलशादेवताभ्यः ब्रह्माविष्णुमहेश्वरादिभ्यः चतुर्वेदेश्वराय सानुचराय
विलवे मासाधिपतये पाद्यं नमः कृष्णाय वासुदेवाय देवक्यै देव्यै बलभद्राय वरुणाय नर्मदायै यशोदायै चं
द्रमसे रोहिण्यै पाद्यं नमः अग्नये ६ इंद्रादिभ्यः पाद्यं नमः पुनः शन्नोदेवीः आपः क्षीरं भगवंतः अर्घ्यं १ त्रि
पादूर्ध्व आपोहिष्ठेति चार्घ्यं त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ततो विष्वङ्व्यक्रामत्साशनानशने अ॰
भि आपोहिष्ठा मयोभुवः इति भगवन् श्रामिसहित हरे मायासहित हृषीकेश वासुदेव संकर्षण प्रद्युम्न अ
निरुद्ध सत्य पुरुष माधव अर्घ्यं गृहाण नमः गणपते इदं वो अर्घ्यं नमः कुमार श्री सरस्वती लक्ष्मी विश्वकर्म
न् द्वारदेवताः इदं वः कृष्ण वासुदेव देवकि देवि बलभद्र वरुण नर्मदि यशोदि चंद्रम रोहिणि जन्माष्टमी २०

व्रतोद्यापनदेवताः इदं वः अर्घ्यं नमः गणपते कुमार श्री सरस्वति लक्ष्मि विश्वकर्मन् द्वारदेवताः प्रजापते ब्रह्म
न् कलशदेवताः ब्रह्माविष्णुमहेश्वरदेवताः चतुर्वेदेश्वर सानुचर अग्ने ९ इन्द्रादयः समस्तयागदेवताः इदं
वः अर्घ्यं नमः तस्माद्विराड शन्नआपइत्याचमनीयं तस्माद्विराडजायत विराजो अधिपूरुषः सजातो अत्यरिच्य
त पश्चाद्भूमिमथो पुरः शन्नआपो धन्वन्याः शन्नस्सन्त्वनूप्याः शन्नस्समुद्रिया आपः शमुनस्सन्तु कूप्याः भग
वते श्रीसमेताय हरये मायासहिताय हृषीकेशाय जन्माष्टमीव्रतदेवताय आचमनीयं नमः शन्नो दे
वी यत्पुरुषं इदमापइतिमंत्रस्नानं यत्पुरुषंव्यदधुः कतिधा व्यकल्पयन् मुखं किमस्य कौ बाहू का ऊरू
पादा उच्यते इदमापः प्रवहत यत्किंच दुरितं मयि यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं मंचैवमापापथ्या
भगवन्श्रीसमेत हरे मायासहित हृषीकेश जन्माष्टमीव्रतयागदेवताः मंत्रस्नानं गृहाण नमः पयोदधि
घृतं मधु लाजासिद्धार्थकास्तिलैः यवव्रीहिकुशादूर्वाश्च अक्षतफलशर्कराः पंचामृतैः पंचगव्यैः कर्पूरौष
धिभिस्तथा एकविंशति स्नानानि गंधाद्भिः कुसुमान्वितं उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्र
थाय अथा वयमादित्यव्रते तवानागसो अदितये स्याम पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो
धः पयस्वतीः प्रदिशः सन्तु मह्यं १ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः सुरभि नो मुखा करत्
प्रण आयूंषि तारिषत् २ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा द्यावापृथिवी वरुण
स्य धर्मणा विष्कभिते अजरे भूरिरेतसा ३ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नस्सन्त्वोषधीः।

ज-स्तू धुवक्रमतोषसा मधुमत्पार्थिवंरजः मधुद्यौरस्तु नःपिता मधुमान्नोवनस्पतिर्मधुमानस्तु सूर्यःमाध्वीर्गावो
उ- भवंतुनः ४ नदस्यरूपमम्हतंशचीभिस्तिस्त्रोदधुर्देवतासंरराणः लोमानिशष्पैर्बहुधानतोक्मभिस्त्वगस्य
२१ मांसमभवन्नलाजा ५ रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रतिष्ठमुपयामिशर्म शिशानोअग्निःक्रतुभिः
समिद्धस्सनोदिवःसरिषःपातुनक्तं ६ तिलोसिसोमदेवत्योगोसवोदेवनिर्मितः प्रत्नमद्भिःपृक्तस्त्रोकान्
प्रणआयाहिनमःस्वधा ७ यवोसियावयास्मद्द्वेषोयावयारातिमिहत्वषदनंत्वालोकमस्तृणामि ८ धान्य
मसिधिनोहिदेवान्धिनोहियज्ञान्धिनोहि यज्ञपतिंधिनोहिमांयज्ञान्यं ९ देवस्यत्वासवितुःप्रसवेश्विनो
र्बाहुभ्यांपूष्णोहस्ताभ्यां १० कांडात्कांडात्प्ररोहंतिपुरुषःपुरुषस्परि एवानोदूर्वेप्रतनुसहस्रेणशतेनच
आक्रम्यवाजिन्पृथिवीमग्निमिच्छरुचात्वं भूम्यावृत्वायनोब्रूहियतःखनेमतंवयं १२ प्रसद्यभस्मनायोनि
मपश्चपृथिवीमग्ने संसृज्यमातृभिष्ट्वंज्योतिष्मान्पुनरासदः १३ याःफलिनीर्याअफलाअकोशाकोशि
नीश्चया बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः १४ शर्कराभिरवकामवकाभिःशर्कराभुन्मादेन जिह्वा
मवक्रंदेनतालुंसरस्वतीजिह्वाग्रेण १५ पंचव्युष्टीरनुपंचदोहागांपंचनाम्नीमृतवोनुपंच पंचदशाःपंचदशो
नक्लृप्तास्समानमूर्ध्नीरभिलोकमेकं १६ समुद्रादूर्मिर्मधुमांउदारदुपांशुनासममृतत्वमानट् घृतस्यनाम
गुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभि १७ त्र्यंबकंयजामहेसुगंधिंरयिपोषणं उर्वारुकमिवबंधनान्
मृत्योर्मुक्षीयमामृतात् १८ याओषधयःप्रथमजाटेवेभ्यास्त्रियुगंपुरा मन्वेनुबभ्रूणामहंशतंधामानि २१

स्मृच ५९ गंधद्वारान्दुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं २० पुष्पवतीःप्रसू
मतीःफलिनीरफलाउत अश्वाइवसजित्वरीर्वीरुधःपारयिष्णवः २१ भगवते सात्वतसंहितायह्रदयेमाया
संहितायहृषीकेशायपुण्डरीकविंशतिस्नानानिनमः ॥ श्रीं वृन्तापयसादध्नाघृतेनमधुनायवैः शार्करासर्षपति
लैस्तथाचामीकरेणवै कर्पूरकुंकुमाभ्यांचलाजाद्योदैःसप्तधान्यैः सर्वौषध्यास्ततःपश्चाद्विष्णोःस्नानानि
षोडश दद्यात्षोडशार्चनवैक्रमात् ॥ ॐसहस्रशीर्षापुरुषः हिरण्यवर्णामिकोनाश्री ५९ ततःविलेपी
केदेवपितॄंश्चतर्पयेच ब्रह्माद्यमितामितिच तद्विष्णुरितिमंत्रगडुकं अग्नेयेविप्रारात्रिकाकृत्वा ताभवाभ्र
विष्णुप्रतिमास्नानस्य रथेअक्षेषेत्यनुलेपनं तद्विष्णोःपरमंपदंसदापश्यन्तिसूरयः दिवीवचक्षुरातत
तद्विप्रासोविपन्यवोजागृवांसःसमिंधते विष्णोर्यत्परमंपदं अग्नयेहरसाहरःशृणीहिविश्वतःप्रति या
सु तुधानस्यरक्षसोबलंविरुजवीर्यं ताभवाभ्रुपमसिगमयेयत्रगावोभूरिशृंगाअयासः अत्राहतदुरु
गायस्यवृष्णःपरमंपदमवभातिभूरि रथेअक्षेषुवृषभस्यवाजेवातेपर्जन्येवरुणस्यशुष्मे इंद्रंयादेवी
सुभगाजजानसेयमागान्वर्चसासंविदाना याहस्तिनिद्वीपिनियाहिरण्येगोषुयापुरुषेषुत्विषःइंद्रंया
देवीसुभगाजजानसेयमागान्वर्चसासंविदाना सिंहेव्याघ्रेउतयापृदाकौत्विषिरग्नौब्राह्मणेसूर्येया इंद्रं
याराजन्येदुंदुभावायतायामश्वस्यक्रंदेपुरुषस्यमायौ इंद्रंयादेवीसुभगाजजानसेयमागान्वर्चसासंवि
दाना ध्रुवाद्यौरित्यासनं दुग्धकुंभोपरिप्रतिमांस्थापयेत् तंयज्ञं युवासोवासइतिवासः तंयज्ञंबर्हि

ज॰सू॰ षिप्रोक्षन्पुरुषंजातमग्रतः तेनदेवाअयजंतसाध्याऋषयश्चये युवासुवासाःपरिवीतआगात्सउश्रेयान्
उ॰ भवतिजायमानः तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतः अग्निसहितायहरयेमायासहिता
२२ यहृषीकेशाय कृष्णायवासुदेवायवासोनमः तस्माद्यज्ञा- यज्ञोपवीतमसित्वुपवीतं तस्माद्यज्ञात्सर्व
हुतःसंभृतंपृषदाज्यं पशूंस्तांश्चक्रिरेवायव्यानारण्याग्राम्यांश्चये यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्य
92 त्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः विष्णवेनारायणाय कृष्णाय
वासुदेवाययज्ञोपवीतंवासोनमः तस्माद्यज्ञा गंधद्वारेतिगंधं तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे छंदां
सिजज्ञिरेतस्माद्यजुस्तस्मादजायत गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्व
येश्रियं भगवतेअग्निसहितायहरये मायासहितायहृषीकेशाय वासुदेवाय संकर्षणाय प्रद्युम्नायअ
निरुद्धायसत्याय पुरुषाय अच्युताय माधवाय सहस्रनाम्नेपुरुषोत्तमायनारायणायसमालभनेगंधो
नमः कृष्णाय वासुदेवाय देवक्यै देव्यै बलभद्राय यशोदायै नर्मदायै चंद्रमसे रोहिण्यै जन्माष्टमीया
गदेवताभ्यःसमालभनेगंधोनमः तथागणपतयेसमालभनेगंधोनमः कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै वि
श्वकर्मणे द्वारदेवताभ्यःसमालभनेगंधोनमः प्रजापतयेब्रह्मणे कलशादेवताभ्यः ब्रह्माविष्णुमहेश्वरदे
वाभ्यःश्रुतवेदेश्वरायसानुचराय मासनाम्नेविष्णवे कृष्णायवासुदेवाय अग्नयेवायवे सूर्याय ब्रह्मणे प्रजापतये
कृष्णर्षिभ्यःसमालभनेगंधोनमः तस्माद्यज्ञापुष्पवतीतिपुष्पं तस्मादश्वाअजायंतयेकेचोभयादतः गावोहज २२

जज्ञिरेतस्मात्तस्माज्जाताअजावयः पुष्पवतीःप्रसूमतीःफलिनीरफलाउत अश्वाइवसजित्वरीर्वीरुधःपारयिष्णवः
भगवतेग्निसहितायहृदये मायासहितायहृषीकेशाय वासुदेवाय संकर्षणाय प्रद्युम्नाय अनिरुद्धाय सत्याय
पुरुषाय अच्युताय माधवाय सहस्रनाम्नेनारायणाय अर्घ्यंनमः पुष्पंनमः कृष्णायनमः वासुदेवाय दे
वक्यै देव्यै बलभद्राय नर्मदायै यशोदायै चंद्रमसे रोहिण्यै जन्माष्टमीव्रतदेवताभ्यः अर्घ्यंनमः पुष्पंनमः
गणपतये अर्घ्यंनमः पुष्पंनमः कुमाराय श्रियैसरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वारदेवताभ्यः अर्घ्यंनमः पुष्पं
नमः प्रजापतये ब्रह्मणेकलशदेवताभ्यः ब्रह्माविष्णुमहेश्वरेभ्यश्चतुर्वेदेश्वरायसानुचराय सहस्रनाम्ने
विश्वेक्षणाय वासुदेवाय देवक्यै देव्यै बलभद्राय यशोदायै नर्मदायै चंद्रमसेरोहिण्यै अर्घ्यंनमः पुष्पंन-
अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये कृष्णादिभ्यः अर्घ्यंनमः पुष्पंनमः इंद्रादिभ्यःसमस्तयागदेव
ताभ्यःअर्घ्यंनमःपुष्पंनमः ततःपुरुषसूक्तेनदेवस्यपुष्पपूजाकार्या लक्ष्मीसूक्तेनच यत्पुरुषं धूरसी
तिधूपः यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् मुखंकिमस्यकौबाहूकाऊरूपादाउच्यते धूरसिधूर्वधू
र्वतंयोस्मान्धूर्वतितंधूर्वयंवयं धूर्वामस्त्वंचधूर्व विश्वेनारायणायधूपोनमः ब्राह्मणोस्य तेजोसीति
दीपं ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत तेजोसिशुक्रमसि
ज्योतिरसिधामासिप्रियंदेवानामनाधृष्टंदेवयजनंदेवताभ्यस्त्वादेवताभ्योगृह्णामि विश्वेनारायणा
यरत्नदीपंगृहाणनमः वासोनमः एतासांदेवतानामर्घ्यदानाद्यर्चनविधिःसर्वःपरिपूर्णश्चरत्न चंद्रमाम-

ज.स्तु
उ.
२३
23

सावित्राणेतिनैवेद्यं चंद्रमामनसोजातश्चक्षोःसूर्योअजायत मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत
सावित्राणिसावित्रस्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां विश्वक्सेनारायणायदधिम-
धुपर्कंनमोनैवेद्यंनिवेदयामिनमः हिरण्यगर्भःनाभ्यासीतिपुष्पांजलिं विश्वक्सेनारायणायकृत्स्नमं
गलिंनमः सप्तस्यासन्नितिचत्वारिप्रदक्षिणानि ॥ पूर्वेनारायणायनमः दक्षिणेपुंडरीकाक्षायनमः
पश्चिमेगोविंदायनमः उत्तरेमधुसूदनायनमः ईशान्यांविश्वक्सेनेनमः आग्नेय्यांजनार्दनाय नैरृत्यांपद्म
नाभाय वायव्यांवामनाय ऊर्ध्ववासुदेवाय अधस्त्रैलोक्यनाथाय मध्येकेशवाय शंखाय चक्राय ग
दायै त्रिशूलाय वनमालायै कृष्णाय अच्युताय गोविंदाय गरुडध्वजाय विश्वक्सेनाय चक्रपाणये वा
मनाय वैकुंठाय पुरुषोत्तमाय वासुदेवाय हृषीकेशाय माधवाय मधुसूदनाय दामोदराय पद्मनाभा
य केशवाय अनंताय अपराजिताय अधोक्षजाय जगद्बीजाय सर्गस्थित्यंतकारकाय अनादिनिधना
य त्रैलोक्येशाय त्रिविक्रमाय नारायणाय चतुर्बाहवे शंखचक्रगदाधराय पीतांबराय नित्याय वन
मालाविभूषिताय श्रीवत्सांकाय जगत्सेतवे श्रीधराय श्रीपतये हरये कृष्णाय वासुदेवाय देवक्यै दे
व्यै बलभद्राय यशोदायै नर्मदायै चंद्रमसे रोहिण्यै ॐनमः तंबालकंसंपूजयेदत्तएवंचतुर्भुजंशंखग
दायुधायुधं श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीतांबरंसांद्रपयोधिसोभगं ॥ अर्घदिनेअर्घयथा
शान्नोदेवीः एताभ्योदेवताभ्यअर्घोपानंनमः आचमनीयंनमः शान्नोदेवीः दक्षिणायेतिलहिरण्यर २३

ततनिष्करणंदद्यानि एताःयागदेवतास्सदक्षिणानेनप्रीयंतांप्रीताभवंतु उभाभ्यांजानुभ्यांपाणिभ्यांशिरसा
वक्षसाचनमस्कारंकुर्यात् ॥ अग्निंपरिसमुह्यपर्युक्ष्यपरिषिच्यपरिस्तीर्य सावित्र्याप्रांतसहितायहृ
दये मायासहितायहृषीकेशाय शुक्लाय वासुदेवाय देवक्यै देव्यै बलभद्राय नंदाय यशोदायै नर्मदा
यै चंद्रमसे रोहिण्यै तथागणपतये कुमाराय समस्तजन्माष्टमीव्रतोद्यापनयागदेवताभ्यः चरुंनिर्व
पामि एवंप्रोक्षणं आज्यभागांतंकृत्वा समिधःप्रत्येकंकुर्यादग्निर्यावितः ततोहुतेनचरुंजुहुयात्पुरुषेणचततः
पुनः इतिपुरुषसूक्तेनषोडशार्चेनसमिद्धोहोमः ततःनिषुसीदगणपतेइतिसर्वमृचकंसमिधाहोमःका
र्यः ततःस्थालीपाकेनपुरुषसूक्तंहोमयेत् पुनर्मृचकं ततआज्येनपुरुषसूक्तं ततःऋचकंतर्पणं आ
नेनमंत्रहोमेनयथोक्तफलप्राप्त्यर्थंसमिधाहोमेनअन्नहोमेनआज्यहोमेनप्रीयंतांप्रीताभवंतु आज्येनकू
ष्मांडानिहोमयेत् यद्युधानाहुतीःचतुर्थहीनेनाज्येनजुहुयात् ततःयवतिलहोमः इदंहवि श्रुतमभिघा
र्य अग्नयेस्वाहाइत्यादि गायत्री इष्टेनमः जनयन्देवपकः गायत्रीब्रह्मणं ततःतर्पणं अध्वर्योयप्रांत्रादिवी
शित्यंततर्पणं इंद्रापर्वताननमोअस्तुसर्पे अदेशोजयेम इत्यंतं तर्पणं अग्निर्ज्योति आकृष्णेनरजसा अग्निर्ने
वइत्यादियहाणांसूक्तानिहोमयेत् सर्वमृचकंयवतिलहोमयेत् पृथक्पृथक्तर्पणंकुर्यात् आज्येनविष्णु
पंचकं रुद्रपंचकं देवीपंचकं रात्रिसूक्तं यागेषयपः ब्रह्ममंत्राणि मरुतिथ्यांदिपतिशिहिभोइत्यंतंकृत्वा
कृतशेषेणनैवेद्यं इडाभागं अग्नेत्वंपारयानव्यो वैश्वानराय यद्देवादेव वैश्वानराय ततःमनोज्योतिसमांतं

जन्म॰ उ॰ २४

24

हुत्वा एवं कृत्वा ततस्तस्य समीपस्तोत्रमन्त्रेण जितंते पुंडरीकाक्ष नमो हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे
ॐ नमो वासुदेवाय पूर्वलिखितदेवायैवं निवेदयेत् इत्यंतं पठेत् चंद्रोदये शशांकाय चार्घ्यं दद्याद् हरिं स्मर
न् अनर्घ्यं वामनं शौरिं वैकुंठं पुरुषोत्तमं वासुदेवं हृषीकेशं माधवं मधुसूदनं दामोदरं पद्मनाभं केशवं ग
रुडध्वजं गोविंदमच्युतं कृष्णमनंतमपराजितं अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारकं अनादिनिधनं देवं
त्रैलोकेशं त्रिविक्रमं नारायणं चतुर्बाहुं शंखचक्रगदाधरं पीतांबरधरं नित्यं वनमालाविभूषितं श्री
वत्सांकं जगत्सेतुं श्रीधरं श्रीपतिं हरिं ॐ योगेश्वराय योगसंभवाय योगाधिपतये गोविंदाय नमः स्नानमं॰
ॐ यज्ञेश्वराय यज्ञसंभवाय यज्ञाधिपतये गोविंदाय नमः अर्घार्चनमंत्रः ॐ विश्वेश्वराय विश्वसंभवाय विश्वा
धिपतये गोविंदाय नमः नैवेद्यमंत्रः ॐ धर्मेश्वराय धर्मसंभवाय धर्माधिपतये गोविंदाय नमः शायनमंत्रः
क्षीरोदार्णवसंभूत ह्यत्रिनेत्रसमुद्भव गृहाणार्घ्यं शशांकेदं रोहिण्या सहितो मम ततः प्रातः नवम्यां पूजा
मात्रं कार्यं ततः ब्राह्मणपूजनं ॐ भूर्भुवः स्वः तत्सवितुः नु नमोस्त्वनंताय जितंते वासुदेवाय कृष्णाय
वासुदेवाय अथ तावत् भाद्रपदमासस्य कृष्णपक्षस्य तिथौ नवम्यां अग्निर्यं विष्णुस्य साक्षाञ्चरस्यादित्यस्या
धर्यो: ब्रह्मविष्णुमहेश्वराणां चातुर्वेदेश्वरस्य प्रामिसहितस्य हरेः मायासहितस्य हृषीकेशस्य कृष्णस्य वासु
देवस्य देवक्याः देव्याः बलभद्रस्य यशोदायाः नर्मदायाः चंद्रमसः रोहिण्याः इंद्रादीनां समस्तजन्माष्टमीव्रतो
द्यापनयागदेवतानामात्मनः श्रुण्यकृत्यर्थं यथोक्तफलप्राप्त्यर्थं जन्माष्टमीव्रतोद्यापननिमित्तं ब्राह्मणपूजनं २४

अर्चामहं करिष्ये ॐ क्रतुस्य यवान्विकीर्य दक्षिणेनं पूजनं कार्यं ततः यागेश्चलां संपाद्य ॐ भूः पुरुषं विस
र्जयामि नमः ॐ भुवः पुरुषं ॐ स्वः पुरुषं ॐ भूर्भुवःस्वः पुरुषं विसर्जयामि नमः ॐ भूर्भुवःस्वः तत्सवितुः ३
नमोस्त्वनंताय वासुदेवाय नमस्कारणवामनाय जितंतेपुष्कलाय वासुदेवाय ३ अद्य तावत् भा
द्रपदमासस्य कृष्णपक्षस्य तिथौ नवम्यां गणपतेः अमावस्यमासपते विष्णोः कृष्णस्य वासुदेवस्य दे
वक्याः देव्याः बलभद्रस्य नंदस्य यशोदायाः नर्मदायाः चंद्रमसः रोहिण्याः इन्द्रादीनां समस्तजन्माष्टमी
व्रतोद्यापनयागदेवतानां आत्मनः श्रेयःपुरुषार्थं श्रीविष्णुप्रीत्यर्थं जन्माष्टमीव्रतोद्यापननिमित्तं विष्णु
पूजनं कलशपूजनं यागपूजनमहं संपूर्णमस्तु एवमस्तु एताभ्यो यागदेवताभ्यः यवोदकं नमः उ
दकतर्पणं नमः अपवित्रोस्मि ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः
केयूरवान्कनककुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः नीलोत्पलदलश्यामप्रफुल्ल
जलजेक्षणः जलशायी जगद्योनिः प्रीयतां मम केशव नारायणस्मरणनिष्ठचित्तवृत्तिर्नारायणप्र
णयपरायणसत्वनीकः नारायणप्रणतिगर्भजुष्टमंगो नारायणो कपारणं स्तुविरभवेयं नाराय
णार्पितशुभाशुभसंचयाय नारायणप्रतिसमाहितचेतनाय नारायणप्रभुरिति स्थिरनिश्चयाय व्या
सायवेदहरिततविदे नमस्ते ॥ भवजलधिगतानां इति ॥ सरसिनिपतितानामिति किं भूयसा त्वत्क
णामीलदनीलमूर्तेः पीतांबरः कमलपत्रविशालनेत्रः कौमोदकीकमलकंबुरथांगलक्ष्मपालक्ष्मी

ज॰ष्टु॰ उ॰ २५ पतिःपृथिपतिःप्रभुराविश्वरस्तु कर्मणामनसावाचायौवनेवार्धकेपिवा यन्मयोपार्जितंपापंतत्सर्वं
हरमेहरे ॥ अपराधसहस्रसंकुलंपतितंभीमभवार्णवोदधौ अगतिंशरणागतंहरेकृपयाकेवल
मात्मसात्कुरु ॥ यच्चिंतितंचमनसावचसायदुक्तंचक्षुःकरश्रवणपादविचेष्टितंच यद्यन्निषण्णा।
स्तदिवसेषुकृतंमयैवतत्तज्जनार्दननवार्चनमेवभूयात् ॥ यद्बाल्येयच्चकौमारेयद्यौवनेकृतंमया
वयःपरिणतेयच्चयच्चजन्मांतरेषुमे तन्नारायणगोविंदत्वमस्वगरुडध्वज अज्ञानाज्ज्ञानतोवापिया।
न्यूनाधिकंचयत् दासस्यममदीनस्यतत्क्षंतव्यंपुरुषोत्तम ॥ अज्ञानादेनयत्किंचिन्मयाखंडव्रतेकृते
भगवंस्त्वत्प्रसादेनतदखंडमिहास्तुमे ॥ मामेस्त्रीत्वंमाचमेदासभावंमामूर्खत्वंमाकुदेशेषुजन्म मिथ्या
दृष्टिर्माचमेस्यात्कदाचिज्जातोजातोविष्णुभक्तिर्भवेयं ॥ यज्ञेनयज्ञेतिविसर्जनं आरोग्यंतरणिः नमो
ब्रह्मणे भगवंतंततोहोत्रे प्रतिमांहोत्रेप्रतिमांदापयेत् सावित्राणि आत्मनःयथोक्तफलप्राप्त्यर्थं
जन्माष्टमीव्रतोद्यापननिमित्तंविष्णुप्रतिमांसहिरण्यंसवाससंसात्रंददानि ततोदध्यक्षततिलैरिति
तर्पणंकुर्यात् अष्टम्युद्यापनादहरे तत्पूर्वंलिखितंब्राह्मणानांशक्त्यासमाप्य दक्षिणांदत्वाग्निंविसृज्य
वैश्वदेवादिनित्यकर्मकुर्यात् ॥ जन्माष्टमीजनमनोनयनाभिरामांतांपापहांसपदिनंदितनंदगो
पां योदेवकीसदयितांयजतीहतस्यांपुत्रानवाप्यसमुपैतिपदंहरेर्विष्णोः ॥ इतिजन्माष्टमीव्रतोद्याप
नम् ॥ शुभमस्तु ॥ ॥ अथपंचमीव्रतम् ॐनमःसरस्वत्यै ॥ मनुरुवाच ॥ ॥ २५

मधुरा भारती केन व्रतेन मधुसूदन तथैव जनसौभाग्यमतिविद्यासुकौशला अभेदश्चापि दंपत्योस्तथा बं
धुधनेषु च आयुश्च विपुलां पुंसां तन्मे कथय माधव मत्स्य उ॰ सम्यक्पृष्टं त्वया राजञ्छृणु सारस्वतीव्रतं
यस्य संकीर्तनादेव तुष्यतीह सरस्वती यो यद्भक्तः पुमान्कुर्यादेतद्व्रतमनुत्तमं तद्वासरादौ संपूज्य विप्रा
नेतान्समाचरेत् अथवादित्यवारेण ग्रहताराबलेन वा पायसं भोजयेद्विप्रान्कृत्वा ब्राह्मणवाचनं शुक्लव
स्त्राणि दत्वा च सहिरण्यानि शक्तितः गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः यथा न देवि भगवान्ब्र
ह्मलोके पितामहः त्वां परित्यज्य संतिष्ठेत्तथा भव वरप्रद वेदशास्त्राणि सर्वाणि नृत्यगीतादिकं च यत्
विनहीनं त्वया देवि तथा मे संतु सिद्धयः लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा मती एताभिः पाहि चाष्टा
भिस्तनुभिर्मां सरस्वती एवं संपूज्य गायत्रीं वीणाक्षमणिधारिणी शुक्लपुष्पाक्षतैर्भक्त्या सकमंडलुपु
स्तकं मौनव्रतेन भुंजीत सायं प्रातश्च धर्मवित् पंचम्यां प्रतिपक्षं च पूजयेत्तु दवासिनी तथैव तंडुल
प्रस्थं घृतपात्रेण संयुतं क्षीरं दद्याद्धिरण्यं च गायत्री प्रीयतामिति संध्यायां च तथा मौनमेतत्कुर्यान्स
माचरेत् नांतरा भोजनं कुर्याद्यावन्मासास्त्रयोदश संप्राप्ते तु व्रते दद्याद्भोजनं शुक्लतंडुलैः पूर्वं सवस्त्र
युग्मं च दद्याद्विप्राय शोभनं देव्या वितानं घंटां च सितनेत्रपटान्वितं चंदनं वस्त्रयुग्मं च दद्यादन्नं च शर्करा
पुनः तथोपदिष्टारमपि भक्त्या संपूजयेद्गुरुं वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः अनेन विधि
ना यस्तु कुर्यात्सारस्वतीव्रतं विद्यावानर्थयुक्तश्च रक्तकंठश्च जायते सरस्वत्याः प्रसादेन ब्रह्मलोके म

हीयते नारीवाञ्छतेयान्प्राप्तिनत्फलभागिनी ब्रह्मलोकेवसेद्राजन्यावत्कल्पायुतत्रयं सारस्वतंव्रतं
यस्तुश्रृणुयादथयिपःपठेत् विद्याधरपुरेसोपियावद्दर्षायुतत्रयं इतिमत्स्यपुराणेमनुमत्स्यसंवादेसा
रस्वतीव्रतं अथपंचमीव्रतोद्यापनंलिख्यते ॐगोमयेनमृभिस्तुपलिप्यपंचगव्येनशोधयेत् अथमचूर्णे
नग्रहमंडलंलिख्यतद्दक्षिणतःपद्मदलनवकंलेखयेत् तत्पूर्वादिकलशाष्टकंमध्येप्रतिमा भद्रपाठा
दिशान्तोदेवीविन्यंनमर्चयेत् यक्षाग्नुदत्पादेवीवाचमजय २ प्राणोदेवी ३ ऋचात्रयंब्रह्मकलशेपूज्य
ततःदक्षिणेकलशमंडले पूर्वादि लक्ष्म्यैनमः मेधायै धरायै पुष्ट्यै गौर्यै तुष्ट्यै प्रभायै मत्यै मध्ये
सरस्वत्यैनमः एवंपूर्वादिदिक्षुविदिक्षुकलशाष्टकेदेवताष्टकंसंपूज्य ततोब्रह्मकलशे अग्नयेनमः
वायवे सूर्याय ब्रह्मणे प्रजापतये कृष्णर्षिभ्योनमः ततःइन्द्रापर्वतादि ऐन्द्राग्रांतंयागमर्चयेत् मधु
पर्कंचनिवेदयेत् ततोयजमानोदक्षिणउपविश्यन्यासकर्मकुर्यात् ॐइयमददात्इतिवामकरे ॐइय
मददाद्यमसंम्रणच्युतंदिवोदासंवध्यश्वायदाशुषे याशाश्वंतमचखादावसंपणिंतातेदात्राणितवि
ष्णासरस्वती इयंशुष्मेतिदक्षिणकरे इयंशुष्मेभिर्बिसखाइवारुजत्सानुगिरीणांतविषेभिरूर्मि
भिः पारावतघ्नीमवसेसुवृक्तिभिस्सरस्वतीमाविवासेमधीतिभिः सरस्वतीदेवइतिवामपादे सरस्व
तीदेवनिदोनिवर्हयप्रजांविश्वस्यवृसयस्यमायिनः उतक्षितिभ्योवनीरविंदोविषमेभ्योअस्रवोवा।
जिनीवति प्राणोदेवीतिदक्षिणपादे प्राणोदेवीसरस्वतीवाजेभिर्वाजिनीवति धीनामवित्र्यवतु २६

यस्त्वादेविवितिवामजानौ यस्त्वादेविसरस्वत्युपब्रूते धने हिते इन्द्रं न वृत्रतूर्ये त्वं देवीति दक्षिणजानौ ।
त्वं देवि सरस्वत्यवा वाजेषु वाजिनि रदा पूषेव नः सनिं उतस्यानकत्या उतस्या नः सरस्वती घोरा हिर।
ण्यवर्तनिः वृत्रघ्नी वष्टि सुष्टुतिं यस्या अनन्तो ह्रुतो यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः अमश्च
रति रोरुवत् सनो विश्वेति नाभौ सनो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी अतन्नहेव सूर्यः उतने
ति हृदि उतनः प्रिया प्रियासु सप्तस्वसा सुजुष्टा सरस्वती स्तोम्याभूत् आपप्रुषीति ग्रीवायां आपप्रुषी पा
र्थिवान्युरु रजो अन्तरिक्षं सरस्वती निदस्पातु त्रिषधस्थेति वामबाहौ त्रिषधस्था सप्तधातुः पञ्चजाता
वर्धयन्ती वाजेवाजे हव्या भूत् प्रयामिति दक्षिणबाहौ प्रयाम हिम्ना महिना सु चेकिते द्युम्नेभिरन्या अपसा
मपस्तमा रथ इव बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती सरस्वत्यभिनोनेति मुखे सरस्वत्यभि
नोनेषि वस्यो मापस्फरीः पयसा मा न आधुक् जुषस्व नः सख्या वेश्या च मा त्वत् क्षेत्राण्यरणानि गन्म यद्वा
ग्वदन्त्य इति नेत्रयोः यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा चतस्र ऊर्जं दुदुहे पयांसि क्वस्विद
स्याः परमं जगाम देवीं वाचमिति मूर्ध्नि देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति सा नो मन्द्रे
षमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॐ तत्पादौ सवितुर्जान्वोः वरेण्यं कटिदेशे भर्गो देवस्य ना
भिं धीमहि कण्ठे धियो नासिकायां यो नः चक्षुषे नः ललाटे प्रचोदयात् शिरसि ततः तीर्थस्थापनं आत्मपू
जा धूपदीपौ संकल्प्य सरस्वतीप्रीत्यर्थं पंचमीव्रतोद्यापननिमित्तं धूपो नमः दीपं नमः भद्रपीठप्रति

पं·च·
मी·उ
२०

मांस्थाप्य अश्विनोप्राणाइतिजीवाधानंदत्वा देहवद्देवन्यासकर्मकुर्यात् ध्रुवाद्यौरित्यासनं ॐभूः इहस्थमा
वाहयामि ॐभूर्भुवःस्वः तत्सवितुः ३ ॐसुभगायैविद्महे काममालिन्यैधीमहि तन्नोगौरीप्रचोदयात्
३ अद्यतावत् अमुकमासस्यामुकपक्षस्यातिथौपंचम्यां गणपतेःकुमारस्य श्रियाःसरस्वत्याःलक्ष्म्याः
विश्वकर्मणःद्वारदेवतानां प्रजापतेर्ब्रह्मणःकलशदेवतानां लक्ष्म्यः मेधायः धरायाः पुष्ट्यः गौर्यः त
ष्ट्यः प्रभायः मतयः मेधायःसरस्वत्यः तथाअग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेःकृष्णर्षीणामिंद्रादीनां
दशालोकपालानामनंतादीनामष्टानांकुलनागानामादित्यादीनामेकादशग्रहाणांवास्तोष्पतिदेवता
नांक्षेत्राधिपतिदेवतानांसमस्तपंचमीव्रतोद्यापनयागदेवतानांआत्मनयथोक्तफलप्राप्त्यर्थंपंचमीव्रतोद्या
पननिमित्तंकलशपूजनंयागपूजनंसरस्वतीपूजनमर्चामहंकरिष्ये ॐकुरुष्व यवान्विकीर्य इयमदद्राधे।
त्यावाहनं गणपतेइदमासनंनमः कुमारस्य श्रियाः सरस्वत्याः लक्ष्म्याः विश्वकर्मणःद्वारदेवतानामिदमा
सनंनमः प्रजापतेर्ब्रह्मणःकलशदेवतानांब्रह्माविष्णुमहेश्वराणांचतुर्वेदेश्वरस्यसानुचरस्यअरुणपतिना
रायणस्यमेधायःसरस्वत्यः अग्नेःवायोः सूर्यस्य ब्रह्मणः प्रजापतेः कृष्णर्षीणांइदमासनंनमः ततःद
क्षिणे कलशानांपूर्वादिलक्ष्म्यः इदमासनंनमः मेधायाःइदमासनंनमः धरायाः पुष्ट्याः गौर्याः तुष्ट्याः
प्रभायाः मतयः मध्ये ध्रुवाद्यौ इयंपृथ्वीभिरित्यासनं मेधायाःसरस्वत्यइदमासनंनमः तथाइंद्रादीनां
दशालोकपालानामिदमासनंनमः अनंतादीनामादित्यादीनांवास्तोष्पतिदेवतानांक्षेत्राधिपतिदेव २०

27

तानां समस्तपंचमीव्रतोद्यापनयागदेवतानामिदमासनं नमः एताभ्यो देवताभ्यः पुष्पाञ्जलिः पूजयामि
ॐ पूजय इयमद्दा ध्येत्यावाहनं एतान्देवताः आवाहयिष्यामि ॐ आवाह्य यवान्विकीर्य प्रार्थ्यब्रह्ममये
स्वच्छे देवीत्रिपुरभैरवी यथाशक्ति जपं पूजां गृहाण परमेश्वरि पद्माधिरूढां स्वसितां त्रिनेत्रां इति ततः
प्राणायामं शन्नोदेवीः लाजाश्च सरस्वती देवनिद्रो हिरण्यवर्णेति पाद्यं मेधायै सरस्वत्यै पाद्यं नमः
गणपतये नमः कुमाराय इति लक्ष्म्यै मेधायै पाद्यं नमः तथा इन्द्रादिभ्यः समस्तयागदेवताभ्यः पाद्यं नमः
पुनः शन्नोदेवीः आपः क्षीरं शन्नोदेवी आपोहिष्ठेति चार्घ्यं मेधे सरस्वति इदं वोऽर्घ्यं नमः गणपते इदं वो
र्घ्यं नमः लक्ष्मि इदं वोऽर्घ्यं नमः मेधे धरा पुष्टि गौरि तुष्टि प्रभा मति इदं वोऽर्घ्यं नमः इन्द्रादयः दशलोक
पालाः अनंताद्यः आदित्यादयः एकादशग्रहाः वास्तोष्पति देवताः क्षेत्राधिपति देवताः समस्तयाग
देवताः इदं वा अर्घ्यं नमः शन्नोदेवीः यस्त्वा देवीत्याचमनीयं शन्न आप इत्याचमनीयं मेधायै सरस्वत्यै
आचमनीयं नमः शन्नोदेवीः त्वं देवि सरस्वत्य इदमाप इति मंत्रस्नानं मेधे सरस्वति मंत्रस्नानं गृहाण न-
ततः स्नानः युवा सुवासा इति वासः मेधायै सरस्वत्यै वासो नमः यस्मा अनंतो यज्ञोपवीतं इति मेधायै स
रस्वत्यै यज्ञोपवीतं वासो नमः मनो विश्वा इति गंधद्वारेति चंदनं मेधायै सरस्वत्यै समालभने गंधो नमः
गणपतये समालभने गंधो नमः कुमाराय इति लक्ष्म्यै समालभने गंधो नमः मेधायै इति इन्द्रादिभ्यः
समस्तयागदेवताभ्यः समालभने गंधो नमः ततः प्रिया प्रिया पुष्पवतीति पुष्पं मेधायै सरस्वत्यै अ
र्घ्यं नमः पुष्पं नमः गणपतये अर्घ्यं नमः पुष्पं नमः कुमाराय श्रियै अर्घ्यं नमः पुष्पं नमः मेधायै धरा

पं·मी ये पुष्ट्यै गौर्यै तुष्ट्यै प्रभायै मतये अर्घ्यंनमः पुष्पंनमः इंद्रादिभ्यः समस्तयागदेवताभ्यः अर्घ्यंनमः
उ· पुष्पंनमः ततः इयमददाद्येति सूक्तेन पुष्पपूजा कार्या यादेवीस्तूयते नित्यंब्रह्मेंद्रसुरकिन्नरैः सामेवा
२९ सतिजिह्वाग्रेपद्महस्तासरस्वती आयपूषिधूरसीतिधूपं त्रिषदस्ता तेजोसीतिदीपं मेधायै सरस्वत्यै
गणपतये कुमाराय समस्तयागदेवताभ्यः धूपोनमः दीपंनमः वासोनमः एतासांदेवतानामर्घ्यादि
नार्घार्चनविधिःसर्वःपरिपूर्णोस्तु प्रियामहिम्ना सावित्राण्येतिमधुपर्कं मेधायै सरस्वत्यै गणपत
ये कुमाराय समस्तयागदेवताभ्यो दधिमधुपर्कंनैवेद्यंनिवेदयामिनमः हिरण्यगर्भः ऋचा ८ सरस्व
त्यभिनो इत्यंजलिं मेधायै सरस्वत्यै कुसुमांजलिंनमः यद्वाग्वदन्तीति प्रदक्षिणं देवीवाचमितिविस
र्जनं अद्यदिने अद्य यथासंकल्पःसिद्धिरस्तु अन्नहीनं प्रान्नोदेवीः एताभ्योदेवताभ्योअपोशानं आचम
नीयंनमः प्रान्नोदेवीः दक्षिणायेति लहिरण्यरजतनिष्क्रयणंददानि एतायागदेवतास्तद्दक्षिणेन
प्रीयंतांप्रीताभवंतु उभाभ्यांजानुभ्यांनमस्कारंकुर्यात् ततःअग्निकर्मम् अग्निंपरिसमुह्यपर्युक्ष्यपरि
षिच्यषोडशास्तरैःपरिस्तीर्य सावित्राणि गणपतये कुमाराय श्रियै मेधायै इंद्रादिभ्यःसमस्तपंचमी
व्रतोद्यापनयागदेवताभ्यः जुष्टंनिर्वपामि एवंप्रोक्षणं आज्यभागांते समिधाहोमः निषुसीदगणपते
इत्यादि प्रान्नोदेवीः अंतंजुहुयात् ततःयद्वाग्वदन्तीतिसमिधाष्टोत्तरशतंजुहुयात् लक्ष्म्यै मेधायै धरा
यै पुष्ट्यै गौर्यै तुष्ट्यै प्रभायै मतये ततःइंद्रापर्वतादि ऐंद्राग्नांतंसर्वमृचकंजुहुयात् ततःअन्नहोमः
निषुसीदइत्यादि प्रान्नोदेवीरंतं जुहुयादन्नेन देवीवाचमिति अन्नेनअष्टोत्तरशतंजुहुयात् ततो लक्ष्म्यै २९

स्वाहा मेधायै स्वाहा धरायै स्वाहा पुष्ट्यै स्वाहा गौर्यै स्वाहा तुष्ट्यै स्वाहा प्रभायै स्वाहा मत्यै स्वाहा
इंद्रापर्वतादि ऐंद्राग्नांतं सर्वं सूचकमंत्रेन जुहुयात् ततः आज्यहोमः निषुसीद मान्नो देवीरित्यंतं आ
ज्येन जुहुयात् प्रणोदेवीरज्येन अष्टोत्तरशतं जुहुयात् इंद्रापर्वता सर्वं सूचकमाज्येन जुहुयात् तत
स्तर्पणं अनेन मंत्रहोमेन आत्मनः यथोक्तफलप्राप्त्यर्थं सरस्वतीप्रीत्यर्थं पंचमीव्रतोद्यापननिमित्तं ग
णपतेः कुमारः श्रीसरस्वती लक्ष्मी विश्वकर्म ब्रह्मा देवताः प्रजापते कलशदेवता अष्टावृत्विक् सरस्वा
तु चरुः ऋतुपतिनारायणः लक्ष्मी मेधा धरा पुष्टि गौरी तुष्टिः प्रभा मती तथा इंद्रादयः अष्टौ कलशागदे
वता आदित्यादयः एकादशग्रहाः सदेवताः वास्तोष्पतिदेवताः क्षेत्राधिपतिदेवताः समस्तयागदेवताः
समिधाहोमेन अन्नहोमेन आज्यहोमेन प्रीयंतां प्रीता भवंतु ततः आज्येन पुरुषसूक्तद्वयं लक्ष्मीसूक्तं ।
तितर्पणं अनेन मंत्रहोमेन षड्गुणपतिनारायणः लक्ष्मीसहितः प्रीयंतां प्रीता भवंतु ततः आज्येन कूष्मां
डानि ततो यवतिलहोमः इदं हविः स्रुतमभिघार्य ॐ अग्नये स्वाहा ॐ भूः ॐ भुवः ॐ स्वः ॐ भूर्भुवः स्वः स्वाहा
ॐ भूः ॐ भुवः स्वः महः जनः तपः सत्यं स्वाहा ॐ भूर्भुवः स्वः तत्सवितुः ब्रह्मणे नमः योगक्षेमो नः कल्पता
मित्यंतं ततो गायत्री ब्राह्मणतर्पणं अनेन मंत्रहोमेन महाव्याहृती गायत्री सावित्री सरस्वती महाव्या
हृतयः गायत्री सहिताः प्रीयंतां प्रीता भवंतु अध्वर्योयं शन्नोदेवीरंतं अनेन मंत्रहोमेन गणपतिकुमा
रः श्री सरस्वति इत्यादि ऋतुपतिनारायणः प्रीयंतां प्रीता भवंतु इंद्रापर्वतापदिशो जयेमइत्यंतं ।

पं·मी·
३·
२९

ततः तर्पणं इंद्रादयदशलोकपाला अष्टौ कुलनागसहिताः प्रीयंतां प्रीता भवंतु अग्निस्तुतिः आकृष्णेन
रजसा ततः अग्निसूक्तानि आदित्यसूक्तादिकं विचार्यित्वा होमयेत् एवंक्रमेण सार्वमंत्र्यकं वा सूक्तानि हो
मयेत् पृथक् पृथक् तर्पणं ततः आज्येन रुद्रपंचकं तर्पणं देवीपंचकं तर्पणं षडृतुसूक्तं या ओषधयः इत्या
मंत्राणि तर्पणं ततः ऋतुतिथ्यादिपरितिष्टुडभोरित्यं तज्जुहुयात् ततो नैवेद्यानि ततो इडाभागाद्दिपूर्णां
तं हुत्वा ततो ब्राह्मणपूजनं ॐभूर्भुवः स्वः तत्सवितुः ३ सुभगायै अद्यतावत् अग्निर्यविष्टस्य सानुचर
स्यादित्यस्यादित्यस्याध्वर्यो ब्रह्मविष्णुमहेश्वराणां चतुर्वेदेश्वरस्य सानुचरस्य ऋतुपतिनारायणस्य मेधा
याः सरस्वत्याः लक्ष्म्याः मेधायाः धरायाः पुष्ट्याः गौर्याः तुष्ट्याः प्रभायाः मतयः इंद्रादीनामादित्यादीनां
समस्तपंचमीव्रतोद्यापनयागदेवतानामात्मनः पुण्यवृद्ध्यर्थं पंचमीव्रतोद्यापननिमित्तं ब्राह्मणपूज
नमर्चामिहं करिष्ये ॐ कृष्ण यवान्विकीर्य अग्निर्यविष्टस्य सानुचरस्यादित्यस्य अध्वर्यो ब्रह्मविष्णुः महे
श्वराणां चतुर्वेदेश्वरस्य ऋतुपतिनारायणस्य इदमासनं नमः लक्ष्म्याः इदमासनं नमः मेधाया इत्यादि
इंद्रादीनामादित्यादीनां समस्तयागदेवतानामिदमासनं नमः एवंक्रमेण दक्षिणां तं कार्ये ततो यागे वक
लक्षणां दक्षिणां संपाद्य ॐभूर्भुवः स्वः तत्सवितुः ३ सुभगायै विद्महे ३ अद्यतावत्तिथावद्य प्रमुकमासस्या
मुकपक्षस्य तिथौ पंचम्यां गणपतेः कुमारस्य इत्यादि इंद्रादीनां समस्तयागदेवतानां आत्मनः पुण्यवृद्ध्य
र्थं पंचमीव्रतोद्यापननिमित्तं कलशपूजनं यागपूजनं सरस्वतीपूजनं महिइं दं संपूर्णमस्तु एवमस्तु एतान्भ्यो

देवताभ्यः यवोदकं नमः उदकतर्पणं नमः ततः क्षमापणानि आपन्नोस्मि आरोग्यं तरणिः आवाहनं च
जनवृक्षमन अग्निहोत्रं कर्मार्पणं व्रतविसर्जनमन्त्रः देवि मोहान्मया विरहितं सकलाय परार्थं मातः नमस्ते वरदे
वह्निरेते सूत्रे याकुन्देन्दुतुषारहारधवलाया श्वेतपद्मासनाया वीणावरदण्डमण्डितकराया शुभ्रवस्त्रावृता
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा दोर्भि
र्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण यासा
कुन्देन्दुशंखस्फटिकमणिनिभा भासमाना समाना सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना देवीवा
चमिति विसर्जनं नमो ब्रह्मणे नमोस्त्वग्नये ततः कलशप्रतिपादनं सावित्राणि सावित्रस्य आत्मनः य
थोक्तफलप्राप्त्यर्थं लक्ष्म्यै कलशं सहिरण्यं सवाससं सान्नं ददानि प्रतिगृह्णामि सावित्राणि मेधायै मे
धाकलशं सहिरण्यं सवाससं सान्नं ददानि प्रतिगृह्णामि सावित्राणि धरायै धराकलशं ददानि सावित्रा
णि पुष्ट्यै सावित्राणि गौर्यै सावित्राणि तुष्ट्यै सावित्राणि प्रभायै सावित्राणि मतये मतीकलशं सहि
रण्यं सवाससं सान्नं ददानि प्रतिगृह्णामि सावित्राणि आत्मनः यथोक्तफलप्राप्त्यर्थं सरस्वतीप्रतिमां स
हिरण्यं सवाससं सान्नं ददानि प्रतिगृह्णामि ततस्तर्पणं ततो दध्यक्षततिलैर्मिश्रं मधुक्षीरमिश्रितं तर्प
येदुदकैर्देवऋषिः पूर्वापितृन्क्रमात् प्रागाननो च देवर्षीन् दक्षिणाभिमुखः पितॄन् [illegible] मे से ब्रह्म
णाधिष्ठितः स्वरः ते सर्वे तर्पिता मायां त्वयेच म्युघापना दूरे द्वादश म्युघापनानि रेलि खितं ततः ब्राह्मणपूजनं
समापयेत् पूर्णां दत्वाग्निं विसृज्य ततो वैश्वदेवादि नित्यकर्म कुर्यात् इति छत्रब्रह्मणस्थाने इति पञ्च म्युघा
पनम्